In Public domain. Digitization Muthulakshmi Research Academy
संस्कृत अकाडमी षष्ठ्यब्दग्रन्थमाला (iii) - 02

डिण्डिमकविप्रणीतम्

॥ सोमवल्लीयोगानन्दम् ॥

(विवेकपत्रमाला डिण्डिमकविजीवनचरित्रसहितम्)

(केन्द्रीयसंस्कृतविश्वविद्यालयस्य अष्टादशीपरियोजनायाः दुर्लभग्रन्थपुनर्मुद्रणपरियोजनान्तर्गतत्वेन प्रकाश्यते)

प्रधानसम्पादकः परियोजना – अनुसन्धाता च

आचार्यः के. नीलकण्ठः

निदेशकः

सम्पादिका

डा. के. वरलक्ष्मीः

उपनिदेशिका

सहायकः

डा. के. वि. सूर्यप्रकाशः

संस्कृत अकाडमी

(केन्द्रीयसंस्कृतविश्वविद्यालयेन मानिता आदर्शशोधसंस्था)

उस्मानियाविश्वविद्यालयः, हैदराबाद् - 07

2023

In Public domain. Digitization Muthulakshmi Research Academy

संस्कृत अकाडमी षष्ठ्यब्दग्रन्थमाला (iii) - 02
In Public domain. Digitization Muthulakshmi Research Academy

डिण्डिमकविप्रणीतम्

॥ सोमवल्लीयोगानन्दम् ॥

(विवेकपत्रमाला डिण्डिमकविजीवनचरित्रसहितम्)

(केन्द्रीयसंस्कृतविश्वविद्यालयस्य अष्टादशीपरियोजनायाः दुर्लभग्रन्थपुनर्मुद्रणपरियोजनान्तर्गतत्वेन प्रकाश्यते)

प्रधानसम्पादकः परियोजना – अनुसन्धाता च

आचार्यः के. नीलकण्ठः

निदेशकः

सम्पादिका

डा. के. वरलक्ष्मीः

उपनिदेशिका

सहायकः

डा. के. वि. सूर्यप्रकाशः

संस्कृत अकाडमी

(केन्द्रीयसंस्कृतविश्वविद्यालयेन मानिता आदर्शशोधसंस्था)

उस्मानियाविश्वविद्यालयः, हैदराबाद् - 07

2023

In Public domain. Digitization Muthulakshmi Research Academy

Sanskrit Academy Ṣaṣṭhyabda Granthamālā (iii)- 02

SomavallīYogānandam

(Re-printing of rare book project)
This book is published with the financial support under Ashtadashi Scheme of **Central Sanskrit University, New Delhi**

Publisher
Director, Sanskrit Academy

Copies can be had from:
Director
Sanskrit Academy
Adarsha Shodha Sanstha
Osmania University,
Hyderabad – 500 007

Phone
8331021001

Email:
sanskritacademyhyd@gmail.com

Web:
https://sanskritacademy.net/

Printed at
Karshak Art Printers,
Vidyanagar, Hyderabad

SomavallīYogānandam

ISBN – 978-93-80171-95-1

© Sanskrit Academy

Year	: 2023
Pages	: liv+44
Copies	: 300
Price	: ₹ 300

Sanskrit Academy Sasthyabda Granthamālā (iii)- 02
In Public domain. Digitization Muthulakshmi Research Academy

Somavallīyogānandam

vivekapatramālā

(Autobiography)

by

Ḍiṇḍimakavi

(Published under 'Re-printing of rare books project', Ashtadashi scheme of Central Sanskrit University, New Delhi)

Chief-Editor & Project Investigator

Prof. K. Neelakantham

Director

Editor

Dr. K. Varalakshmi

Dy. Director

Assistance

Dr. K. V. Suryaprakash

Sanskrit Academy

Adarsha Shodha Sanstha

(Recognised by Central Sanskrit University, New Delhi)

Osmania University,

Hyderabad – 500 007

2023

In Public domain. Digitization Muthulakshmi Research Academy

Sanskrit Academy Ṣaṣṭhyabda Granthamālā (iii)- 02

Somavallīyogānandam

(Re-printing of rare book project)
This book is published with the financial support under Ashtadashi Scheme of **Central Sanskrit University, New Delhi**

Publisher
Director, Sanskrit Academy

Copies can be had from:
Director
Sanskrit Academy
Adarsha Shodha Sanstha
Osmania University,
Hyderabad – 500 007

Phone
8331021001

Email:
sanskritacademyhyd@gmail.com

Web:
https://sanskritacademy.net/

Printed at
Karshak Art Printers,
Vidyanagar, Hyderabad

Somavallīyogānandam

ISBN – 978-93-80171-95-1

© Sanskrit Academy

Year : 2023
Pages : liv+44
Copies : 300
Price : ₹ 300

Preface

In Public domain. Digitization Muthulakshmi Research Academy

ओम् श्री गुरुभ्यो नमः

।।श्रीशङ्करभगवत्पादाः विजयन्ते।।

Sanskrit Academy has long ago Published Vikramorvashiyam of Mahakavi Kalidasa in 1966 with three Sanskrit Commentaries. And again, we have published the same drama Vikramorvashiyam with a rare commentary called Ratnadipika, and also Abhijnana Shakuntalam with a commentary Purnachandrika. These commentaries were composed by Mrutyunjaya Nisshanka Bhupala of Andhra Pradesh. These two were published in difficult Telugu script in 19th century. And now we are bringing out a drama titled as ***SomavalliYoganandam*** of Dindimakavi.

We have obtained a hand written Manuscript bearing the Acc No. 133/A call no 55-237 of this drama from the Government Oriental Manuscript library in Hyderabad. We are grateful to the Director Dr Subba Rao who permitted us to edit and publish it from Sanskrit Academy. This is a *Prahasana* type of drama among the ten varieties of dramas[1] defined in Sanskrit poetics.

I appreciate the honest efforts of Dr K. Varalakshmi, Deputy Director of the academy. She made a thorough research on the life of Dindimakavi and studied well this book **सोमवल्लीयोगानन्दम्** and prepared a very exhaustive foreword that could be useful for further research. I congratulate Dr K. Varalakshmi and wish her to bring some more critical editions of the rare Sanskrit works.

---

[1] नाटकं सप्रकरणं भाणः प्रहसनं डिमः। व्यायोगसमवकारौ च वीथ्यङ्केहामृगाः.

 In Public domain. Digitization Muthulakshmi Research Academy

I thank another deputy director Dr V. Subrahmanyam and Dr K. V. Suryaprakash and Dr Joshi Santosh Kumar research assistants for their continuous help in the publications of Academy. I bless my young and sincere research scholar Mr Joshi Bharadwaj who made this book ready for publication.

I thank Prof Srinivasa Varkhedi Hon'ble V.C. and Prof. Gayathri Muralikrishna Registrar I/c and Director, Aadharsh Institutions in CSU, New Delhi, for their continuous encouragement and for sanctioning such projects to Sanskrit Academy. I thank our Hon'ble Chairman Prof. D. Ravinder V. C. and Prof. P. Lakshmi Narayana Registrar of Osmania University for their amicable support for the development of Sanskrit Academy.

I thank Karshak Art Printers Vidyanagar, Hyderabad for printing this book on time.

सुधीजनविधेयः

Prof. K. Neelakantham

Director

In Public domain. Digitization Muthulakshmi Research Academy

प्रस्तावना

लौकिकसंस्कृतवाङ्मयं दृश्यं श्रव्यञ्चेति द्विधा विभक्तम्। तत्र दृश्यं काव्यं रूपकमिति व्यवह्रियते।

अवस्थानुकृतिर्नाट्यं रूपं दृश्यतयोच्यते।
रूपकं तत्समारोपात् दशधैव रसाश्रयात्[2]।।

नाट्यमेव रूपकमिति नामान्तरेण उच्यते। तस्य नाट्यस्य प्राशस्त्यं कालिदासः मालविकाग्निमित्रे नाट्यं चाक्षुषः क्रतुः इति अभ्यवर्णयत्[3]। पुनः एतन्नाट्यम् अथवा रूपकं दशधा भवति। दशसु भेदेषु अन्यतमः प्रहसनम्।

हस्तलिखितमातृकाग्रन्थपरिचयः

सप्तचत्वारिंशत्पुटात्मकः हस्तलिखितमातृकाग्रन्थोऽयं तेलङ्गाणा राज्यस्थे हैदराबादस्थप्राच्यलिखितग्रन्थालये सम्प्राप्तः। Acc No. 133/A, call no. 55-237 इति सङ्ख्यान्वितोऽस्ति। कर्गदमयः ग्रन्थः। अरुणगिरिनाथः डिण्डिमकविरिति बिरुदनामाभिधः सोमवल्लीयोगानन्दमिति प्रहसनं चकार। अरुणगिरिनाथः प्रहसनेऽस्मिन् आदौ डिण्डिमकविरिति स्वपरिचयं प्रास्तौत्। अनेन बिरुदेनैव सः लोके प्रसिद्धिं गतः इति ज्ञायते। अस्य कवेः जीवनचरितं विशिष्टमावहति।

डिण्डिमकविः-सूत्रधारः नान्द्यन्ते प्रस्तावनायां सोमवल्लीयोगानन्द प्रहसनस्य कर्तुः डिण्डिमकवेः वंशप्राशस्त्यं प्रस्तौति। अन्तर्गतप्रमाणैरेतैः कवेरस्य जीवनविशेषाः ज्ञातुं शक्यन्ते।

---

[2] दशरूपकम् - 3

[3] देवानामिदमामनन्ति (मालविकाग्निमित्रम्)

 In Public domain. Digitization Muthulakshmi Research Academy

'अस्ति खलु नरेन्द्राग्रहारनायकमणेःसामवेदसांयात्रिकस्याष्टभाषा कविता-साम्राज्याभिषिक्तस्य बल्लाळरायकटककविकुलगर्वपर्वतपवेर्नागनकवि नागकेसरिणः श्रीकविप्रभोः पौत्रः पुत्रः श्रीराजनाथदेशिकस्य ब्रह्माण्डभाण्ड पिचण्डमण्डलितविजयडिण्डिमरवचण्डिम्नः श्रीकण्ठागमशिखण्डमण्डनमणेः श्रीडिण्डिमप्रभोः दैहित्रः श्रीमदभिरामनायिकाम्बास्तनन्धयः सभापति भट्टारकाचार्यभागिनेयः श्री डिण्डिमकविसार्वभौम इति प्रथितबिरुदनामा सरस्वतीप्रसादलब्धकवितासनाथः श्रीमानरुणगिरिनाथः । तेन कृतेन सोमवल्लीयोगान्दनाम्ना प्रहसनेन सभानियोगमनुतिष्ठामि'

अहो फलितं मलिनं कर्म ,

कविः स्वयं डिण्डिमसार्वभौमः संसद्गुणैकग्रहणोन्मुखीयम् ।
अस्मिन् प्रबन्धे विनयप्रगल्भाःवयं च नाट्यैककलाविदग्धाः ॥10॥

प्रहसनस्यान्तेपि कविनाम उल्लिखितम्-

'इति डिण्डिमकविविरचितं सोमवल्लीयोगानन्दं नाम प्रहसनं सम्पूर्णम्' ॥

सोमवल्लीयोगानन्दप्रहसनस्य प्रस्तावनायां दत्तस्य विवरणस्य अनुसारं डिण्डिमकविः नरेन्द्राग्रहारवासिनः श्रीकविप्रभोः पौत्रः अभिराम नायिकाम्बाश्रीराजनाथदेशिकयोः सूनुः सभापतिभट्टारकाचार्यस्य भागिनेयः श्रीडिण्डिमकविसार्वभौम इति प्रथितबिरुदनामा श्रीमानरुणगिरिनाथः।

बाह्यप्रमाणानि

1. Contribution of Andhras to Sanskrit Literature

चोलानां शासनकाले वङ्गदेशादागताः पण्डिताः दक्षिणभारते तिरुवन्नामलै समीपे मुल्ताण्ड्रम् इति देशे स्थिरनिवासं चक्रुः। विजयनगरशासकानाम् आदरपात्रतां गताः इमे डिण्डिमबिरुदेन प्रसिद्धाः जाताः। डिण्डिमकविवंशजः

In Public domain. Digitization Muthulakshmi Research Academy

राजनाथकविः बल्लालशासकस्य आस्थानकवीन् शास्त्रस्पर्धायां जित्वा कविप्रभुरिति बिरुदेन सम्मानितः। प्रथमः अरुणगिरिनाथः अष्टभाषाप्रवीणः। दर्शनाभिज्ञः शैवसिद्धान्तवेत्ता च। अभिनवनाटकभवभूतिः डिण्डिमकवि सार्वभौमः इति बिरुदाञ्चितश्च। महानाटकसूक्तिसुधानिधिरिति अस्य नाम्ना या कृतिः अस्ति सा वस्तुतः दवितीयदेवरायः व्यरचयदिति विमर्शकानाम् अभिप्रायः। रामाभ्युदय महाकाव्यमपि सालुवनरसिंहकृतमिति मन्यन्ते। सोमवल्लीयोगानन्दमिति प्रहसनमपि अनेन डिण्डिमकविना विरचितम्। अस्मिन् प्रहसने योगानन्द नामा सन्न्यासी राजपुरोहितस्य पुत्री सोमवल्ली नायिकानायकौ आस्ताम्। द्वयोः प्रणयवृत्तमेव हास्यस्फोरकतया कविः व्यरचयत्।

अस्य पुत्रः राजनाथः सालुवनरसिंहास्थानम् अलञ्चकार। राजनाथः सालुवाभ्युदयः इति चारित्रककाव्यं व्यरचयत्। राजनाथस्य पुत्रः अरुणगिरिनाथः वीरभद्रविजयः इति डिमे दक्षयज्ञकथाम् अवर्णयत्। अयमपि कुमारडिण्डिमादिबिरुदाञ्चितः। अस्य पुत्रः राजनाथः अच्युतरायाभ्युदयः इति महाकाव्यं भागवतचम्पूकाव्यञ्च व्यरचयत्। अस्य ग्रन्थस्याधारेण प्रथमः अरुणगिरिनाथः योगानन्दप्रहसनस्य कर्तास्ति।

विवेकपत्रमाला - आसूरिरङ्गस्वामिसरस्वतिः इति नामाभिधः कश्चन प्रसिद्धः पुरातत्त्वज्ञः विभागरत्नमाला इति अमुद्रितमातृकाग्रन्थं विलोक्य तत्रत्यविशेषान् साहित्येतिहासग्रन्थेषु अक्षरबद्धं चकार। अस्यैव मातृकाग्रन्थस्य विवेकपत्रमाला इति नामान्तरमपि अस्ति। आसूरिरङ्गस्वामि सरस्वतिवर्यस्य मार्गदर्शनेन अपरः कश्चन पुरातत्त्वज्ञः टि. गोपीनाथरावः त्रिवेन्द्रवासी किञ्चन शोधलेखमलिखत्।

 In Public domain. Digitization Muthulakshmi Research Academy

टि. गोपीनाथरावः 'Indian Antiquary' इति शोधपत्रिकायां[4] विवेकपत्रमाला इति नाम्ना शोधलेखं प्राकाशयत्। विवेकपत्रमाला अरुणगिरिनाथस्य वंशमाहात्म्यं संस्कृतश्लोकैः प्रस्तौति। संस्कृतमातृका ग्रन्थोऽपि शोधलेखान्ते उद्धृतः। टि. गोपीनाथरावः विवेकपत्रमालायाः सारम् आङ्गलभाषया अनूदितवान्। अनेन लेखेन अरुणगिरिनाथस्य जीवनविशेषाः ज्ञातुं शक्यन्ते। विवेकपत्रमाला यथातथमत्र प्रस्तूयते। तदनु टि.गोपीनाथराववर्यस्य आङ्ग्लभाषागतशोधलेखोऽपि अत्रौद्रियते येन अरुणगिरिनाथजीवनविशेषाः स्पष्टीभवन्ति।

---

[4] (एप्रेल् 1918 खिस्ताब्दः)

In Public domain. Digitization Muthulakshmi Research Academy

॥ विवेकपत्रमाला ॥

(विभागरत्नमाला)

जयन्ति जगतीतले कवयतां प्रवाचां पुरो
वलन्ति वसुधावलारिहृदये त एते बुधाः ।
वसन्ति विदुषां शिरोनटनङ्गके ये परं
ह्यवापुरनपायतो विमतखण्डने डिण्डिमम्।।1।।

मूलाण्डवास्तव्यमहाजनानां कालान्तरेऽपि स्वकुलावगत्यै।
वेलां कुलाब्धेः सुविवेकपत्रमालां सुहृत्कण्ठगतां सृजामि।।2।।

अस्ति मन्दारकं नाम वृन्दारकपुरोपमम्।
मन्दाकिनीजलक्लेदमन्दादित्यं महापुरम् ।।3।।

सोमनाथमखिसोमपीथिनः सोमशेखरपदाब्जसेवकाः ।
ऊषुरत्र बहुशास्त्रवक्तृकाः सम्प्रदायकुशलाश्चिराय ते ॥4।।

चोलस्य राज्ञः किल काञ्चिमण्डले चिकीर्षतो बुद्धिरभूच्छिवालयान्।
मन्दाकिनीतीरजुषो द्विजन्मनः निजाग्रहारेषु निवासयिष्यतः ॥5।।

गङ्गाभङ्गात्पार्श्वतः प्राप्य भङ्गं मन्दाराख्यो मन्दकेदारभूमिः ।
तस्मादेते ग्राममुन्मुच्य हीनं चोलं प्राप्ता यात्रया प्राप्तगङ्गम् ।।6।।

स्नात्वा त्रिपथगां गङ्गां दृष्ट्वा विश्वेश्वरं शिवम् ।
आनयिष्यामि तत्रत्यान्विदुषो ब्राह्मणानिति ॥7।।

चोलो भूमिपतिर्विवेच्य बहुशो विद्वद्गुणालङ्कृतान्
सर्वानग्निचितस्त्रिवेदकृतिनो नित्यक्रियातत्परान्।

 In Public domain. Digitization Muthulakshmi Research Academy

श्रौते ब्रह्मणि निष्ठितान् विधिमुपस्पृश्यात्मपर्यन्तकं
काञ्चीमण्डलमानिनाय सहसा सम्मान्य सम्मान्य (?नि) तान् ।।8।।

काश्यपा गौतमाश्चैव सावर्ण्याः शाण्डिला अपि ।
श्रीवत्साश्च भरद्वाजा गोतमा अपि सामगाः ।।9।।

सांकृत्या इति चेमेऽष्टौ गोत्रतः परिकीर्तिताः ।
प्रासादवल्लभो यज्वा भास्कराख्यकविस्तथा ।।10।।

राजनाथकविश्चैव सुब्रह्मण्यकविस्तथा ।
जटाधरेशयज्वा च नीलकण्ठकविस्तथा ॥11।।

दीक्षितः सोमनाथाख्यो मल्लिकार्जुनभट्टकः।
आगत्य काञ्च्यामवसन्विख्याप्य च विदग्धताम् ।।12।।

तुण्डीरमण्डलमहामणिमण्डपस्य
तल्पायमानवरतल्पगिरेश्च पश्चात् ।
कौटिल्यहारकनदस्य च पूर्वभागे
चोलश्चकार रुचिरं पृथुमग्रहारम् ।।13।।

पञ्चाशदुत्तरचतुःशतनिष्कमूल्यं
ग्रामं विभज्य दशधा दशवंशनाढ्यम्।
अष्टाविमानपि च भागवतो विधाय
भागावुभावपि च भागवतो ।।14।।

सर्वैपि सर्वैरपि मान्यतायां स्वग्राममापुः किल सर्वमान्यम् ।
तस्यापि सर्वैरपि मान्यतायामद्यापि नान्यो भवतीति मन्ये ॥15।।

In Public domain. Digitization Muthulakshmi Research Academy

राजनाथपुरे तत्र राजनाथाभिधं शिवम् ।
राजनाथकविस्तुत्यै राजनाथः स संन्यधात् ।।16।।

किञ्चामी नृपतौ गते निजपुरं सञ्चारयन्तः क्रतून्
मङ्क्षुग्राममुपेत्य सञ्चितधनाः पञ्चापि पञ्चाग्नयः ।
क्लेशानीशपदार्चनादगमयन् केशान्ददुः (?) कोशजान्
पाशान् पाशभृतो विधूय सुचिरं कालं च तेऽका(?गा)लयन् ।।17।।

मेत्तप्पाडीति नामाहुर्ग्रामस्यापि गिरेरपि ।
द्राविडा औत्तरा यत्र त्वासते श्रोत्रियोत्तमाः ।।18।।

एवं गते बहुतिथे नृपविप्रगाले
वंशेषु तेषु गमितेषु च पञ्चषेषु।
वेलूरुरायकुलभूमिपहायनानि
आ(?ह्या) विर्बभूवुरचिरेण सुशोभनानि।।19।।

प्रासादवल्लभमखीन्द्रबुधस्य तत्र
श्रीपुण्डरीकपुरनायकसेवनायाः।
पुत्रा बभूव गुणसार्थकसारनामा
श्रीमान्सभापतिरिति प्रतिभानयुक्तः।।20।।

पाण्ड्यश्चेरश्चोलराजश्च यस्य शिष्या आसञ्छाङ्कराः किङ्कराश्च।
ढक्कावाद्यं हस्तिमल्लस्य शीर्षे ढङ्काराध्यं हन्यते यस्य याने ।।21।।

ढक्कासभापतिरिति प्रथितः पृथिव्यां
विद्याविनीतिविभवैर्गुरुरास साक्षात्।।22।।

In Public domain. Digitization Muthulakshmi Research Academy

तस्यैव नप्ताजानिभास्करार्यः प्रसन्नकाव्यस्य च यः प्रणेता ।
सर्वेषु शास्त्रेषु सहस्रशीर्षः स एव चाग्नीनचिनोत्समस्तान् ॥23।।

तस्यैव वंशे तपनप्रकाशे स त्यागराजोऽवततार धीरः ।
यः कामकोटीश्वरपीठिकायां विद्याजयस्तम्भमधत्त यज्वा ।।24।।

गुरुस्वयंभूविभुनामयज्वा श्रीमद्गुरुस्वामिमहामती च।
सुतावभूतां विमलोज्ज्वलाङ्गौ श्रीत्यागराजार्यसुधीमणेर्द्वौ।।25।।

दक्षिणामूर्तियज्वा च भास्कराख्यश्च दीक्षितः।
तदा द्वौ गौतमावास्तां वंशे भास्करयज्वनः।।26।।

विद्यापतिमखी चैव दिवाकरकविस्तथा ।
त्रयोऽमी सूर्यमदृश्च राजनाथकवेः कुले ॥27।।

गुरुमूर्तिकविश्चैव शिवसूर्यमखी तथा
द्वावेतौ शाण्डिलौ ख्यातौ सुब्रह्मण्यकवेः कुले ॥28।।

शिवसूर्यमखी चैव सुब्रह्मण्यमखी तथा ।
रामलिङ्गमखी चैव रामचन्द्रबुधस्तथा ॥29।।

जटाधरगुरोर्वश्याश्चत्वारो लोकविश्रुताः ।
श्रीमच्छङ्करयज्वा च नीलकण्ठमखी बुधः॥30।।

यज्ञनारायणो विद्वान्यज्वानन्तकविः परः ।
इमे पञ्चभरद्वाजा नीलकण्टकवेः कुले ॥31।।

राजनाथकविश्चैव श्रीवेङ्कटकविर्गुरुः ।
द्वावैतो सोमनाथस्य कुले विख्यातकीर्तिकौ ॥32।।

In Public domain. Digitization Muthulakshmi Research Academy

देवारामाह्वयो यज्वा मल्लिकार्जुनसन्ततौ ।
एकविंशतिरेषां तु कुलान्यासन्विभागतः ॥33।।

गुरुस्वयं भूपतिनामयज्वनः
सभापतीति प्रथितस्तनूदितः ।
तथा गुरुस्वामिसुतस्य सन्ततौ
सुतावभूतां च यमौ यमोज्वलौ ॥34।।

अभिरामाम्बिका कन्या सोमनाथश्च पुत्रकः ।
तामेव कन्यां जग्राह राजनाथस्तु गौतमः ।।35।।

सर्वासामपि नारीणामभिरामाम्बिका वरा ।
सौन्दर्यशीलसौभाग्यगुणैरुत्तुङ्गतां गता ॥36।।

अन्वर्थनाम्न्यामतिरागवत्यामपुष्पवत्यामपि भाग्यराशिम्।
प्रसूय पुष्पं सकृदेव सापि त्रयोदशे जन्मत एव वर्षे ॥37।।

शुक्तीव विद्वन्मणिमग्रगर्भे दधार लोकस्य विभूषणाय ।
चतुस्सहस्रेषु चतुःशतेषु गतेषु वर्षेषु कलोर्युगस्य ।।38।।

श्रीराजनाथस्य कवेर्वधूटी
प्राचीव जाजीकुसुमैः समर्चन् ।
स राजनाथोऽधिजगौ(?) कुलासवात्
कटाक्षचन्द्रं तनयं प्रजज्ञे।।39।।

शुभे मुहूर्ते सति जातमात्रे सपुत्रके शोणधराभिधाने ।
सर्वा च भूमिर्मुमुदे सरस्यः प्रसेदुराशा अनुकूलवाताः॥40।।

 In Public domain. Digitization Muthulakshmi Research Academy

राजनाथः कविः प्राप्य तनयं विनयान्वितम् ।
न वव्रे ब्रह्मवादीव काममन्यमहर्निशम् ॥41।।

नार्थी बभूव केनापि यथा सर्वमहीपतिः ।
भाविनं सार्वभौमं तं भावयन्करणैःसुतम् ।।42।।

विद्यारण्यदयोदयार्द्रवपुषा विश्वार्थविश्राणिना
विष्णुब्रह्मशिवालयान् रचयता श्रीबुक्कभूपात्मना ।
देवेनार्पितमग्रहारमभजन्नत्यूरुसंज्ञं स्वयं
तल्पग्रामगता विभक्तसहजास्ते सप्त संसारिणः॥43।।

ज्योतिश्शास्त्रविदं च कञ्चन बुधं कर्णाटकब्राह्मणं
पञ्चाङ्गस्य सुवाचनाय सहिता अस्थापयन्वृत्तिदाः ।
तत्सोदर्यमभीक्ष्णमक्षरकृतं सङ्ख्याविदं गेहिनां
सङ्ख्यानार्थममुं च सन्निदधिरे ग्रामस्य भृ(?कृ)त्वा तदा ।।44।।

उभौ पञ्चाङ्गणकावेकश्चालयपूजकः।
एते महाजनास्सप्त तथा दशनिकेतनाः॥45।।

औदुम्बरग्रामगताः शास्त्रवेदान्तचिन्तनैः।
सन्ध्यातिथिसमर्चाभिरुपासत महेश्वरम् ।।46।।

चोलप्रतिष्ठिते ग्रामे नवग्रामसमीरिते ।
इत आक्रम्य वाचाभिः कर्षणैः पशुपोषणैः।
बुक्कभूपाभ्यनुज्ञाता ऊषुर्दश निवेशनैः।।।47।।

स राजनाथः कविराजवर्यः शोणाद्रिनाथं तनयं स्फुरन्तम् ।
वेदादिविद्याव्रतमाजनाय निनाय तत्रैव गुरुप्रियत्वात् ।।48।।

In Public domain. Digitization Muthulakshmi Research Academy

पुत्रस्योपयमं विचिन्त्य मनसा श्रीराजनाथः कविः
प्राप्यैवोपयमं स्वयं तु सहसा सम्प्राप्य शम्भोःपदम् ।
पुत्रं भ्रातरि सोमनाथमखिनं(?नि) प्रविद्य वेद्याखिलम्
बालं भासिकुलावलिं(सी) त्वनुजगामैवाभिरामाम्बिका ।।49।।

श्रीसोमनाथस्त्वनुजातनूजं तनूजवर्गाच्च निजादतीव ।
पुपोष शय्यासनलेपनाङ्गसंवाहवस्त्राभरणार्हणैस्तैः ।।50।।

एवं मातुलगेहपोषणजुषः शोणेन्द्र(णाद्रि) संज्ञावतो
वेदाधीतिवशात्त्रयोदश वयांस्यासन्गुणानां निधेः।
सासूयाभवदत्र मासुलवधूनिष्कारणक्रोधिनी
जानीते न स जातु तत्कविवरः श्रीसोमनाथाभिधः ।।51।।

महाजनकृतागसां विहितमालयं शाम्भवं
शिवार्चकजनेन तं समुपगम्य शोणाचलः।
नवा...च्छिवं हृदि विचिन्त्य विद्यापतिं
स मातुलवधूक्रुधा शयनमेव मेने वरम् ॥52।।

अनुजातनुजन्मानमनालोक्य निजालये।
सोमनाथाभिधो यज्वा व्यचिनोत्सकलां महीम् ।।53।।

तृतीयो दिवसे प्रातरपश्यत्स नदीतटे।
ताम्बूलरसरक्तोष्ठं तं निधिं दुर्गतो यथा।।54।।

आलिङ्ग्याङ्के समावि(?वे) श्य शिरस्याघ्राय वै मुहुर्मुहुः।
पप्रच्छ किमिदं वत्स? तवेति भगिनीसुतम् ।।55।।

 In Public domain. Digitization Muthulakshmi Research Academy

यदृच्छया नवग्राममागत्यापी (?वि) शमालयम् ।
विद्यापतीशप्रमुखे सुप्त आलस्यबाधितः ।।56।।

अर्धेन्दुचूडः शरदिन्दुसुन्दरः स्फुरन्मणीमूर्धफणीशकङ्कणः ।
बालैर्मुनीन्द्रैश्च चतुर्भिरन्वितो बुबोध मां कश्चिदुपेत्य पूरुषः।।57।।

सुप्तस्य मे संभ्रमलोलबुद्धेर्वक्त्रस्य देशे विवृते स्वभावात् ।
ताम्बूलसारं निजवक्त्रसंस्थं मुमोच कारुण्यसमुद्र एषः।।58।।

तेनैव रक्ता रसना मदीया तच्छोधनायेह समागतोऽस्मि ।
उक्त्वेति स स्तोत्रततिं चकार वटस्य मूले वसतः शिवस्य ।।59।।

स तोषयामास नवाभिषिक्तं तं प्रौढदेवं नृपमिन्दुतुल्यम् ।
कवित्वशक्त्या च विचाररीत्या विवादसामर्थ्यवशेन तत्र।।60।।

स प्रौढदेवः कविराडसौ च स्नेहातुरावेकमनःप्रसारौ।
शरीरभेदं च समीचिकीर्षूतुल्याम्बरस्रग्वलयावभूताम् ।।61।।

सावर्ण्यकन्यामुपयम्य सम्यग्यज्ञाम्बिकां नाम यज्ञक्रियार्हाम् ।
यज्ञैः सचिभिर्बहुदक्षिणाकैरीजे महेशादिमरुद्गणान् स्वान्।।62।।

तल्पग्रामस्य याम्यायामौदुम्बरपुरात्पुरः।
नवग्रामस्य वायव्ये राजाराममकल्पयत् ।।63।।

प्रत्यक्प्राक्कोशमात्रं तु तदर्धं दक्षिणोत्तरे ।
अनेकफलपुष्पाढ्यनागवल्लीक्षुमण्डितम्।।64।।

नीलगिर्याख्यवणिजं तत्राध्यक्षं नृपो व्यधात् ।
अथ सप्ताद्रिदेशे तु राज्ञोद्याने प्रकल्पिते ।।65।।

In Public domain. Digitization Muthulakshmi Research Academy

इदमुद्यानमुद्वीक्ष्य राज्ञी जग्राह रुक्मिणी ।
उद्यानजीवी नीलाद्रिर्धनिको गर्वितोऽभवत् ।।66।।

आरामैःफलपुष्पभारविनमच्छाखाग्रकूजच्छुकैः
प्राकारेण पयोदपद्धतिजुषां दोग्धैर्(?) गवां मण्डलैः।
तल्पग्रामजुषः परेश्वरमसावाराधयामास त-
च्छ्रीशोणाद्रिकवीश्वरो नृपगुणैर्बन्धुप्रियश्चाभवत् ।।67।।

जातु नीलगिरिः कोपादाकृष्य च गवां कुलम् ।
कविराजमुपागम्य कटुकारमवोचत् ।।68।।

अभीक्ष्णमेता गावस्ते राजाराममुपद्रुताः।
कृच्छ्रधाराङ्कुरां (?) जग्ध्वोन्मूलयन्ति लतातरून् ।।69।।

श्वः प्रभृत्यागतानां वा बन्धोऽस्माभिर्विधास्यते।
तदुन्मोक्ता क्रमाज्याद्दक्षिणाशापतिः प्रभुः ॥70।।

इदमुक्त्वा गते तस्मिन् गता गावश्च तत्पदम् ।
गतेऽपि काले दोहस्य गा मुमोच न वै वणिक् ।।71।।

गोपावेदिनवृत्तान्तः प्रत्याख्यातश्च तेन सः।
प्रौढदेवाय तद्राज्ञे निवेद्येदमवोचत् ।।72।।

आराममखिलं मह्यमग्रहारयितुं दिश।
अन्यथा मन्यथा मां त्वमन्यराष्ट्रकुटुम्बिनम् ।।73।।

श्रुत्वेति नृपतिर्ज्ञात्वा स्वयं प्राह कवीश्वरम् ।
प्रमदालम्बितैषा मे प्रमदावनभूः स्वयम् ।।74।।

In Public domain. Digitization Muthulakshmi Research Academy

अन्यां भुवं प्रदास्यामि सस्यागमसमाकुलाम् ।
श्रुत्वेति तमवाधूय वेङ्कटाद्रिमुपाययौ।।75।।

सुरबाणराजं जगत्त्राणदक्षं
द्विजत्राणदीक्षं निजत्राणसक्तम् ।
द्विजेभ्यो विदित्वा निजेभ्यो वदित्वा
जगाम द्विजा पुरं हस्तिनाख्यम् ॥76।।

दुरीक्षं समक्षं नृपस्येति मत्वा
दिदृक्षुर्नृपं तं विवक्षुः स्वमर्थम् ।
कवीशोऽयमीशप्रभावो नृपद्वारदेशे
प्रपद्यावतस्थे निजं शोकमर्धम्।।77।।

तत्पठित्वा नृपतावाहुरसूयातरला द्विजाः।
दाक्षिणात्यकविः कश्चिद्वार्यर्धश्लोकमालिखत् ।।78।।

राज्यपर्यायवाच्यायां राजपत्न्यां रतोत्सुकः ।
इति तत्कथयत्वर्धं श्रीमान्पश्यतु तत्प्रभुः ।।79।।

सुरत्राणे ततः क्रुद्धे विचारयति मानसे।
लवङ्गी तनया तस्य तातमाह शुभां गिरम् ।।80।।

विद्वानर्थी च भूत्वा कः स्फुटमेवं रचिष्यति ।
अन्यथैव भवेदर्थं आनेय इति वै कविः।।81।।

ततः समाहूय सभां कवीशसम्मान्यवाचा कविराह्वमर्थ(?क्ष)म् ।
श्लोकः प्रपूर्याशु च पठ्यतां भोः समादिदेशेति कविं नृपाग्र्यः।।82।।

In Public domain. Digitization Muthulakshmi Research Academy

अर्थो विचार्यतां विज्ञैरालङ्कारिकसम्मतः ।
इत्युक्त्वा स पपाठाशु श्लोकं सम्पूर्य चात्मनः।।83।।

सुरत्राण भवद्राज्ये निद्रातुमहमागतः।
अनिद्रस्त्वन्यदेशेषु त्वदागमनशङ्कया ।।84।।

कविमल्लोऽनपायाख्यो राजसन्निधिपूजकः ।
डिण्डिमं वाद्यमाहत्य जयनृपुरभृत्पदे ॥85।।

एतच्छ्लोकप्रसङ्गेन स कविं प्रत्यपद्यत ।
कविमल्लः कवीशश्च वाचा पुनरुपस्थितौ।।86।।

प्रतिज्ञां चक्रतुर्दृष्ट्वा वाद्ययकमविवर्जने।।
निग्रहे चात्मनः प्राप्ते सति राजबुधाग्रतः॥87।।

त्रयोविंशे दिने प्राप्ते सर्वशास्त्रविचारतः ।
निगृहीतोऽनपायाख्यो गर्वितः कविमल्लकः॥88।।

वाद्यं डिण्डिममस्य नूपुरवरं हस्तीन्द्रमुत्कुम्भकम्
विद्वत्कण्ठगतां वितीर्य विमतानाधूय वालाश्रियः (१)।
सौवर्णे मणिरञ्जिते समभिषिच्यैनं सुभद्रासने
विद्याडिण्डिमशोणशैलकविरित्याख्यां विभुर्दत्तवान् ।।89।।

जातु तत्र निशाकाले चन्द्रशालास्थितो नृपः।
अवोचद्वर्णयस्वैनमुद्यन्तं शशिलाञ्छनम् ।।90।।

प्राचीभागे सरागे धरणिविरहिणिकान्तमुद्रे समुद्रे
निद्रालौ नीरजालौ धृतमुदि कुमुदे कोकलोके सशोके ।

In Public domain. Digitization Muthulakshmi Research Academy

आकाशे सावकाशे तमसि शमभिते निर्विचारे चकोरे
कन्दर्पेऽनल्पदर्पे विकिरति किरणान्शार्वरीसार्वभौमः ।।91।।

वर्णयामासुरन्येऽपि यथामति विभोः पुरः।
एष शोणीन्द्र(?णाद्रि)यज्वा तु इत्याशु लोकमपठत् ॥92।।

शृण्वत्सु च सभासत्सु राजा प्राह कवीश्वरम् ।
सार्वभौमो न राजोऽयं द्विजराजो भवानिति ।।93।।

सोऽयं डिण्डिमसार्वभौमकविरित्याख्यां वहन्भूतले
काव्यं रामपदाङ्कितं चरितमप्याकल्पयन् रूपकम् ।
ग्रन्थांस्तत्र चतुष्पथे विरचयन्प्राप्य प्रतिष्ठा विभुं (? भोः)
देवत्राणमहीपतेर्निजभुवं प्रापाज्ञया वाञ्छिताम् ।।94।।

आज्ञाचीटीमसौ दृष्ट्वा सुत्राणमहीभुजः ।
प्रौढदेवो नृपः प्रादात्प्रमदावनकाश्यपीम् ।।95।।

अथाग्रहारस्य सिसृक्षयासौ समेत्य सर्वैरपि बान्धवैः स्वैः ।
तटप्रदेशे कुटिलापगायाः सभां वितन्वन्स बभाण सर्वान् ।।96।।

पञ्च पल्ल्यस्त्रयो ग्रामाः सन्ति नः समुदायतः।
अविभज्यैव भोज्याः स्युरिति सौम्या मतिर्हि नः ॥97।।

सम्पा(? विवा)दयतु कोवात्र समस्त्रीमो वयं समम् ।
ग्रामं वा कण्ठिकां वापि श्रोत्रियं मान्यमेव च ॥98।।

इति श्रुत्वा वचः सर्वे साधूक्तीः प्रत्युदैरयन् ।
अथ तैः प्रमदोद्यानमाविवेश कवीश्वरः ।।99।।

In Public domain. Digitization Muthulakshmi Research Academy

उदक्प्राक्प्रवणं देशमवाक्प्रत्यक्समुन्नतिम् ।
ग्रामस्य सन्निवेशा<u>यामोकत</u> शुभाशुभम् ।।100।।

शतं च सप्तैव पदानि मित्वा चतुस्समुद्रांश्च निखाय शङ्कून् ।
कृषीवलानादिशदत्र क्रुष्टं ते लाङ्गलैराचकृषुः समन्तात्॥101।।

सिरामुखे लाङ्गलकर्षिताग्रै समुद्भवाद्भुतलिङ्गमूर्तिः।
स्वायम्भुवो नाथ इति प्रतीत श्चिदम्बरे यो वरदो वरेण्यः।।102।।

गाण्डीवदण्डाहतिपार्श्वदेशे स्फुरत्यजस्रं हलकोटि<u>षष्टिः</u>।
यस्यैव शम्भोः स्वयमुद्भवस्य स नाम चक्रे सदसस्पतीति।।103।।

शतव्यायामतस्तस्मान्नैरुत्यां दिशि वैष्णवम् ।
प्राङ्मुखं कविराजश्च चकारायतनं कविः।।104।।

तत्पुरस्सन्निधिश्रेणीश्चतुर्दशगृहात्मिकाः।
एकावल्या विरचितास्तथा पश्चात्गृहद्वयम् ।।105।।

उभयश्रेणिका वीथी दक्षिणं पक्षमाश्रिता ।
निवेशनैः द्वादशभिरन्वितं शुभवेदिकैः ।।106।।

अष्टाशत्यु (१)त्तरशतं शूद्राणां सदनानि तु ।
कृषीवलानां दासानामभितः कल्पितानि हि।।107।।

ततः समाजे विदुषां ग्रामत्रयनिवासिनाम् ।
ग्रामस्य चक्रे नामानि पञ्च श्रोत्रमुखानि च ।।108।।

प्रौढदेवो ददौ यस्मात् प्रौढदेवपुरं भवेत् ।
सार्वभौमः स्वयं कर्ता सार्वभौमपुरं ततः॥109।।

 In Public domain. Digitization Muthulakshmi Research Academy

यत्र स्थितानां विदुषां सामान्यं डिण्डिमं यतः ।
डिण्डिमालयमित्यस्य नाम प्रोक्तं तृतीयकम् ।।110।।

चोलेषु चेरेषु च पाण्डभूमौ त्रिमण्डलीवृत्तिजुषां द्विजन्मनाम् ।
वासाय तेषामिह यत्प्रकल्प्यते त्रिमण्डलं तत्कवयः प्रचक्षते ॥111।।

मूला इतीह विद्वांसस्तेषामण्डं समाश्रयः।
मूलाण्डमति तन्नाम तस्माद्वक्ष्यन्ति वै बुधाः।।112।।

अत्यूरुपुत्तूरिति मेत्तपाडी ग्रामास्त्रयः सन्ति विपश्चितां ते।
येषां च तेषामिह वाससत्वात् त्रिमण्डलं तेन भवेदपीदम् ।।113।।

पुत्तूरुवासिनां पूर्ववीथिका सन्निधौ हरेः।
औदुम्बरग्रामजुषामुत्तरं पक्षमादिशत् ।।114।।

तल्पग्रामगतानां तु दक्षिणः पक्ष ईरितः।
पश्चाद्वेश्मद्वयं दत्तं देवालयसमर्चिनोः॥115।।

काश्यपा दशवेश्मानो गौतमा नववेश्मिनः।
सावर्ण्याः सप्तदशकाः शाण्डिलाः सप्तवेश्मनिः ।।116।।

श्रीवत्साश्च त्रिवेश्मानो भारद्वाजा दशालयाः।
सामगा गोतमाश्चैव अ(?ह्य)ष्टालयकुटुम्बिनः।
षड्वेश्मानस्तु साङ्कृत्या इति सप्ततिसङ्ख्यकाः ।।117।।

।। इति विवेकपत्रमाला ।।

In Public domain. Digitization Muthulakshmi Research Academy

टि. गोपीनाथरावर्वर्येण काव्यान्तरमपि स्वलेखे प्रमाणत्वेन प्रस्तूय अरुणगिरिनाथस्य तत्पुत्रस्य राजनाथकवेश्च जीवनविशेषाः निरूपिताः। गुरुरामकविकृतसुभद्राधनञ्जयनाटकं **राजनाथकविकृतभागवतचम्पूः सोमवल्ली योगानन्दप्रहसनञ्चेति कृतयः शोधलेखे उल्लिखिताः।**

प्राज्ञानामेव राज्ञां सदसि न सहते जल्पमल्पेतरेषां
क्षुद्रेष्वाक्षेपमुद्रां न खलु गणयते **डिण्डिमः सार्वभौमः।**
भाङ्कुर्वद्भेककुक्षिम्भरिषु भयभरभ्रान्तभोगीन्द्रसुभ्रू
भ्रूणभ्रंशी किमम्भःफणिषु पतगराट् सम्भ्रमी बम्भ्रमीति ।।

॥ गुरुरामकविकृतसुभद्राधनञ्जयनाटकम् ।।

अस्ति किल काश्यपगोत्रस्य तत्रभवतो गुरुरामकवेः कृतिः सुभद्राधनञ्जयं नाम नाटकम् । नूनं तद्दर्शी परिषदादेशः। सूत्रधारः-श्रूयतां तावत् । अस्ति खलु **तुण्डीरमण्डले मूलाण्डं नाम महानग्रहारः।**

तत्र केचन वसन्ति काश्यपाःश्रोत्रियाः धृतशिवार्चनव्रताः।
यैरघोरशिवदेशिकादिभिःप्रत्यपादि परतत्वमैश्वरम् ।।

अपि च

सार्वभौमकविप्रख्या वश्यवाचो बहुश्रुताः।
गुणोत्तरतया सर्वे गुरून्सम्भावयन्ति यान् ।।

तेषामन्यवभूषणस्य तनुभूरेष स्वयम्भूगुरोः
दौहित्र कवितानिरूढयशसः **श्रीराजनाथस्य** च।
एनामप्यकरोत्कृतिं श्रितगुणग्रामः स रामः कविः
काव्यं कृष्णपरं व्यधाच्छिवपरं चम्पूप्रबन्धं च यः॥

 In Public domain. Digitization Muthulakshmi Research Academy

॥ राजनाथकविकृतभागवतचम्पूः ॥

अस्तु श्रियै श्रीसुहृदच्युतेन्दैरैश्वर्यसिध्यै पतिरञ्जनाद्रेः।
बलाय जेता बलिदानवस्व पुमर्थहेतोः पुरुषः पुराणः ॥1।।

प्रकाश्य पाणिश्रितमेणमग्रे स्वाधीनयन्स्वान्तमुग्रं मुनीनाम् ।
आवर्जयेदच्युतभूवलारेरवार्यमैश्वर्यमहार्यधन्वा ॥2।।

उच्चारभङ्ग्या युगपच्छ्रुतीनामुपात्तसाफल्यचतुरमुखीकः ।
आयुष्कलामूचतुरायमौलेस्सकल्पमाकल्पयतादृविधाता ॥3।।

धम्मिल्लशैवालधरा विराजदपाङ्गमीनाधरविद्रुमाक्षा ॥
धन्या पितृच्छायतयाब्धिकन्या तन्यादवन्यां श्रियमच्युतेन्दोः ।।4।।

पुष्यात्पुरन्ध्री पुरशासनस्य पुङ्खानुपुङ्खां श्रियमच्युतेन्दोः ।
कलानिधानं दधती कबर्यां संयोजयन्तीव सदा रजन्या ।।5।।

निशायान्निर्मलसूक्तिपूरं नेतुं प्रणन्नान् घटयन्त्रमेव।
पाणौ वहन्ती स्फटिकाक्षमालां वाणी पुराणी वशवर्तिनी स्यात् ॥6।।

सुवर्णरूपैः शुभनयकाङ्कैः रौज्ज्वल्यवद्भिर्ध्वनिमद्भुवानैः ।
परिष्कृतादिक्षितिपान् प्रबन्धैः प्राचेतसाद्यान् प्रणुमः कवीन्द्रान् ॥7।।

कथं नु वर्ण्या भुवि कालिदास मयूरमाघादिमहाकवीन्द्राः ।
पुरातनीं पूरुषभूमिकां यद्वेषेण धृत्वा विननर्त वाणी ।।8।।

कर्णौ नयन्तां कवितां कवीन्द्राश्चमत्क्रियां कामपि याति सेयम् ।
पयोधिशुक्तौ पतितं च पाथः प्रयाति मुक्ताफलतां न किं वा ॥9।।

In Public domain. Digitization Muthulakshmi Research Academy

व्यासोक्तिपूराद्वसुदेवसूनोःकथां गृहीत्वा कथयामि किञ्चित् ।
सन्ति स्रवन्त्यो भुवि तत्पयोभिःकुल्योपभोगाय कुतो न भूयात् ॥10।।

वंशावलीमच्युतभूवलारेरवक्ष्यामि वर्धिष्णुवदान्यलोकाम् ।
ममोक्तिरेषा महतः स्तवेनपवित्रिता स्यादिति पार्थिवेन्दोः ॥11।।

अस्ति खलु कुवलयामोदहेतुः अम्बरपरिषदायुष्यावलम्बनं अवतंस-मणिरम्बिकापतेः अभिवृद्धिनिदानमम्बुनिधानस्य सहकृत्वा शम्बररिपुसाम्राज्य-श्रियः मानसशुक्तिमुक्ताफलं मधुनिषूदनस्य सुरतरुरम्भासहोदरः सुधाकरो नाम।।

परपूरुषदारसोदरत्वं प्रथमं प्राप्य निजान्वयोद्भवानाम् ।
परदारसहोदरव्रतं यः परमध्यापयतीव पार्थिवानाम् ॥12।।

सरोरुहे सामजखेलनानि समन्ततश्चक्रयुगेऽपि भेदम्
दानं सुरेभ्यस्तमसि प्रयुङ्क्ते दण्डं च यो दण्डितराजभावः ॥13।।

ततो बुध इति श्रुतोऽजनि पुरूरवा जातवा
नतोऽभवदपाकृतप्रतिनृपायुरायुस्ततः ।
अतः स नहुषोऽभवत्तदुदितो ययातिर्जिता
भियातिरुदभूदतो धरणिधूर्वहस्तुर्वसुः ॥14।।

महितगुणमहितसमवाये महति तदन्ववाये नामान्तराणीव नाभागस्य मातृका इव मान्धातुः पुनरवततार इव पुरूरवसः, द्विरुक्तय इव दुन्दुमारस्य, निदर्शनानीव निमेः, अजायन्त कतिचिदनूचाना राजानः ।।

रत्नानि सन्ति रचिताभ्युदयानि सिन्धोः
ख्यातिं परामयति कौस्तुभरत्नमेकम् ।

 Public domain. Digitization Muthulakshmi Research Academy

तेजोविजृम्भणतृणीकृततिग्मधामा
तेषु प्रतीतमहिमाजनि तिम्मभूपः ॥15।।

पतिदैवतदेवकीतपस्या परिपाको मनुनीतिपारदृश्वा ।
उदधेः परिणीरिवौषधीनामुदभूदीश्वरभूवलारिः ।।16।।

दुर्गेशताविभवधूर्वहयोरहार्य धाम्नोरियान्नियतनीश्वरयोर्विशेषः।
आपीडितद्विजपतिः प्रथमो द्विजानामव्याजपालनकलाभिरतो द्वितीयः॥17।।

अपास्तखेदानवनीधुरीणान्फणाधरेन्द्रप्रमुखान्विधातुम् ।
अजायतामुष्य स बुक्कमायां नयोपदेष्टा नरसक्षितीशः ।।18।।

यस्य खलु हृदयङ्गमगुणसम्पदः साम्परायिकप्रस्थानमेव सम्मुखापतद्विजरवाभ्युत्थानं पटुतरगुणारोपणमेव परिपन्थिकुलपौरुषावरोपणं, कोदण्डरभसकुण्डलीकरणमेव कुनृपतिमदकुण्डलीकरणम्।

यस्यासिना रिपुनृपैणविलोचनानामक्ष्यश्चालादपहृतं नवमञ्जनं यत् ।
आद्यैश्च भूपतिभिरादरणीयकीर्ति निक्षेपदर्शननिदानमभूत्तदेव ।।19।।

अस्मादच्युतभूवलारिरुदभूदव्याजबन्धुः सता
मन्तेवासिपदे तरून् दिविषतामौदार्यतः स्थापयन् ।
इन्धे पूर्वनृपानपत्रपयितुं यस्य प्रशस्यं यशो
यस्मिन्नेति दया वृषाचलपतेरेकातपत्रश्रियम् ॥20।।

यस्य खलु सुघटितपात्रसंविधानेषु षोडशमहादानेषु घटीयन्त्रवदनियन्त्रणैश्वर्य सलिलनिधावावृत्तिमधिगतेषु परिवहमाणेन दानपयसा समन्ततोऽखिलभुवनकेदारान्तरैधन्त यशःकलनसन्ततयः।

In Public domain. Digitization Muthulakshmi Research Academy

यस्याशास्य प्रवृत्तेर्भुजविजयरमाचारुवेण्या कृपाण्या
राजन्यैर्जन्यभूमौ रभसविदलितैरन्ध्रितं चेन्न बिम्बम् ।
व्योमाकारे कटाहे विमलतरयशःपूरपूर्णेऽवतीर्णो
मार्ताण्डो नूनमह्नां मणिमयघटिकामानपात्री भवेत्किम् ।।21।।

पीत्वा दानपयांसि यस्य जलदस्तत्सेकरूढं तृणं
चर्वित्वा मरुतो वशेन गमितं नाकौकसां नैचिकी।
व्याकीर्णं दिवि तत्करीषशकलं सम्प्राप्य च स्वर्द्रुमा
विख्यातिं त इमे भजन्ति नियतं विश्राणनश्रेयसीम् ।।22।।

कदाचन कविबुधगायकवैहासिकवन्दिवृन्दारकानवद्यविद्यापरीक्षण-विनोदकल्पितकालक्षेपः सततवन्दनागतसामन्तनिकुरुम्बकराम्बुजयुगली-मुकलीकरण लक्षणीयराजभावः प्रेष्यमुखप्रेषितवनायुजवाजिवारणादिविविधो-पदावलोकनमात्रकृतार्थितपरपार्थिवगणो महत्तरमणिमयैकातपत्रमण्डली-प्रवर्तितावर्तसम्मिलत्साम्राज्यकलशाम्बुधिफेनकलिकायमानाभ्यां सकलभुवन-सञ्चरणसन्दोहल(?)यशोमरालिपक्षपालिकासमरसाभ्यां धवलचामराभ्या-मुपवीज्यमानो विनय इव विग्रहवान्, विस्रम्भ इव विलोचनगोचरः सदार(?)इव सचेतनः राशिरिव रामणीयकस्य समाहार इव सद्गुणानामुद्भवखनिरिवौ-बाम्बिकामोदसम्पदां नयनोपहारो नरसमहीनायकस्य विश्रमस्थानमिव विश्वम्भरायाः निदर्शनमिव नीतिदर्शिनाम् आधार इवौदार्यस्य रजनिकरकुल-प्रदीपः स राजराजपरमेश्वरो **राजनाथकविमिदमवादीत्** ।।

स्वादु शौरिकथालापसुधापूरप्रणालिका ।
कृतिः कृतिजनग्राह्या भवता क्रियतामिति ॥23।।

In Public domain. Digitization Muthulakshmi Research Academy

सोऽयं कविस्तदनु शोणगिरीन्द्रसूनु राज्ञागिरं नरपतेरवतंसयित्वा ।
चम्पूप्रबन्धमजहत्सरसोक्तिबन्धं वक्तुं समारभत वाग्विभवानुकूलम् ।।24।।

विस्तारिणी व्यासमुखोक्तिपूरात्कथां गृहीत्वा कथयामि पुण्याम् ।
अम्भो नयन्ती पृथगापगानां कुल्योपभोगाय कुतो न भूयात् ।।25।।

टि. गोपीनाथरावर्यस्य आङ्ग्लभाषागतशोधलेखः अरुणगिरिनाथ-जीवनविशेषपरिज्ञानाय अत्रोद्धियते।

शोधलेखः – विवेकपत्रमाला VIVEKAPATRAMALA.

(BY T. A. GOPINATHA RAO, M.A.; TRIVANDRAM.)

THE Vibhagapatramâlâ, a manuscript hitherto unpublished, whose existence was brought to my knowledge by Mr. Rangasvâmi Sarasvati, B.A., and which is a very late production, gives some account of the poets of the village of Mullandram. It gives us some glimpses into the lives of a few of them, more especially, of Arunagirinatha (otherwise known also as Sônâdrinatha, &c.) and his son Rajanâtha Kavi. It is stated therein that a Chôla king who went on a pilgrimage to Benares (Gangaikonda Râjêndra Chôladêva I. is evidently referred to here) was met there by a number of learned men of the village of Mandâra. This king being pleased with the erudition and character of these people took them with him to his dominions for the purpose of erecting temples for Siva and settled them in the Kâñchimaṇḍala. They were eight in number and belonged to eight different gôtras; their names and gotras are as follows:

1. Prâsâdavallabha - Kasyapagôtra
2. Bhaskarakavi - Gautamagôtra.
3. Râjanâthakavi - Sâvarṇyagôtra
4. Subrahmanyakavi - Sandilyagotra

In Public domain. Digitization Muthulakshmi Research Academy
5. Jaṭâdharêsa Dikshita - Srivatsagotra
6. Nilakanthakavi - Bharadvajagôtra
7. Sômanâtha Dikshita - Gôtama (Sâmaga) gôtra and
8. Mallikarjunabhatta- Saukṛitigôtra.

After some time, the Chôla king granted them an agrahara worth 450 nishkas of gold, which was named Mettaippâḍi (translated in Sanskrit as Talpagiri) and which was divided into ten shares, of which eight were given to the above named eight brahmanas and two to the god of the local temple. In this village which was also known as the Râjanâthapura (perhaps after one of the donees, No. 3 of the above list), Râjanâtha built a temple for Siva and set up in it a linga which he called Rajanâthêśvara. The hill situated on the east of their village was called the Mettaippâḍimalai. The first of the donees, Prâsâdavallabha Dikshita, had, by the grace of the god of Chidambaram (Pundarîkapura), a son named Sabhâpati. The kings of the Chêra, the Chôla and the Pandya countries became his disciples; whenever Sabhâpati went out, a drum (dhakka) mounted on an elephant used to be sounded to announce the advent of the illustrious poet. Hence he was better known as Dhakkâ Sabhâpati. The great grandson of Dhakka Sabhapati was Bhaskarârya, the author of the Prasanna kávya. In this family was born the poet Tyâgarâja who set up a pillar of victory in the Kâmakôtiśvara pitha (i.e., the Sankaracharya matha which is at present situated in Kumbhakôṇam). Tyagaraja had two sons named Svayambhu and Gurusvâmi.

The contemporaries of Svayambhu in the other families were:

Dakshinamurti Yajvâ and Bhaskara Dikshita of the family of Bhaskara Dikshita of the Gautamagôtra; Vidyapatimakhi, Divâkarakavi and Sûryabhatta of the family of the Râjanathakavi of the Savarnyagôtra; Gurumûrtikavi

In Public domain. Digitization Muthulakshmi Research Academy

and Sivasûryamakhi of the family of Subrahmanyakavi of the Sandilyagotra; Sivasuryamakhi, Subrahmanyamakhi, Ramalinga makhi and Ramachandra of the family of Jatâdharêśa Dikshita of the Srivatsagôtra; Sankarayajva, Nilakanthamakhi, Yajñanârâyana and Anantakavi of the family of Nilakanthakavi of the Bharadvajagôtra; Râjanâthakavi and Vêṇkaṭakavi of the Gôtamagôtra; and Dêvarâma... of the family of Mallikarjunabhatta of the Sankritigôtra; thus the original eight families consisted, in the time of Svayambhu, of twenty-one households.

Svayambhu had a son named Sabhâpati, and Gurusvâmi had a daughter named Abhirâmâmbika and a son called Sômanátha, who were born twins. Abhirâmâmbikâ was married to Rajanatha of the Gôtamagotra; she attained her age in her 13th year, and in the Kali year 4400 expired (A.D. ....) gave birth to a son named Sonadhara (or Arunagiri).

Of the twenty-one householders mentioned above seven left their native village Mettaippadi and began to reside in the village of Attiyur granted by Bukkaraya as an agrahara to Brâhmaṇas. The king Bukka is described in the manuscript as one who had received the grace of the sage Vidyâranya, who was the giver of all desired objects and who was the establisher of several temples for Vishṇu and Siva. These seven people employed a Karnataka brâhmana and his brother as the Panchangi and accountant respectively on a fixed pay and another brahmana for doing pûja in the local temple. These ten families lived in Attiyûr cultivating their knowledge of Vedanta and other sástras. They had friends in the adjacent village of Puttûr founded by the Chola kings.

Sônâdrinatha (Arunagirinatha) was sent to a teacher to learn all sastras. While studying, his father who was

In Public domain. Digitization Muthulakshmi Research Academy

anxious to have his son married, died. The boy was taken under his charge by his uncle Sômanâtha, for, his mother Abhirâmâmbika committed sati with her deceased husband. After some time had passed, Arunagirinatha found the wife of his uncle not at all kind to him; her ill-treatment made him run away from his uncle's house. All along Sômanatha was ignorant of the fact that his nephew was not accorded proper treatment by his wife and when he found the boy missing he set about searching for him. Three days after he found him on the river bank, his lips tinged red with betel. When questioned about the matter, he explained that feeling tired he slept away the previous night in the Saiva temple in Puttûr (Navagrahara), meditating upon Vidyâpati, the god of that temple. He then dreamt that a person whose head was ornamented with the crescent moon, whose arms were adorned with bracelets of snakes, and who was accompanied by a number of children and four disciples approached him and spat in his mouth the betel he was chewing. Seeing that his lips were coloured red he got up to wash them in the river and therefore he happened to be then by the side of the river. Forthwith he burst into poetic effusion and ever since became a famous versifier and by his divine gift he attracted the attention of the then newly crowned king Praudhadêvarêya Mahârâya and became a very intimate friend and companion of the king. He married Yajñâmbika, a girl belonging to the Sâvarnyagötra. There was a pretty garden belonging to the crown, situated on the south of the village of Mettaippadi (Talpagrâma), on the east of Attiyûr (Audumbarapura) and on the northwest of Puttûr (Navagrama); the officer who was in charge of this garden was named Nilagiri. Once when Rukmiṇi, the queen of Praudhadevaraya saw this garden she liked it so well that she desired to possess it and the king immediately made over this property to her. The cows of

In Public domain. Digitization Muthulakshmi Research Academy

the Brahmana villages near by used to enter the garden and destroy the valuable plants. Nilagiri protested against the straying cattle, but the brahmanas paid no heed to his protestations. Then he detained the cattle and declined to liberate them : among those thus penned there were some cows belonging to Soṇâdri (Arunagiri). Incensed at the insolence of Nilagiri, Soṇadri appealed to the king not simply to order Nilagiri to liberate the cows, but to grant him the garden so that he might build an agrahara on its site. The king, however, declined to interfere with the estate of his queen. Sôṇadri then left the kingdom of Praudhadêvarêya, it is stated, and proceeded to that of the Suratrana (Sultan) where by the cleverness of his composition he got access to his presence and pleased him very much. The court poet by name Anapaya, surnamed Kavimalla, came out with his characteristic drum, dindima, beating, to meet Aruñagiri in an intellectual wrangle: it was resolved that if Kavimalla was defeated by Soṇadri he should deliver all his distinctions to the latter. Unfortunately for him, he was overcome by Soṇâdri and lost his title and distinctions. The Sultan then decorated him with the distinguishing appellation of " Vidyâdindima Soṇaśaila Kavi " and detained him for some time with himself. On one occasion Arunagiri so pleased the Sultan with his poetic talent that the latter conferred upon him the title of Dindima-sârvabhauma-kavi.' Arunagiri rendered the story of Rama into a kávya and a nataka and wrote also several works on sastras. Having thus distinguished himself in the court of the Sultan and having pleased him, Arunagiri got a note of the Sultan ordering Praudhadêvarêya to grant the queen's garden near Puttûr to Arunagiri (1). Praudhadevaraya, it is said, quietly gave away to Arunagiri the garden belonging to his queen. Arunagiri then ordered an agrahara to be built there on the bank of the river Kutila ; in the middle of which was

In Public domain. Digitization Muthulakshmi Research Academy

constructed a temple for Siva under the name of Sabhâpati and on the south-east corner another for Vishṇu. This new village received five different names, namely, Praudhadêvarayapuram, Sárvabhaumapuram, Dindima-layam, Trimandalam and Mûlândam. Though Dindimakavi-sârvabhauma often caused panic in the minds of great poets, he never interfered with the lesser ones. The above is an abstract of the contents of the Vibhagapatramála. From this we see that the so-called " deed of division" is nothing more than a panegyric on DiṇdimakaviSårvabhauma Arunagirinatha. The genealogy of this person as gathered from the manuscript may be tabulated thus:

In Public domain. Digitization Muthulakshmi Research Academy



In Public domain. Digitization Muthulakshmi Research Academy

*Arunagiri alias Sonadri received the grace of Siva in becoming a poet; contemporary of Praudhadevara; rendered the story of Rama into a kavya and also a nataka; obtained the birudas of Dindimakavi sarvabhouma; defeated Anapaya, alias kavimall.

The members of the family of Svayambhu have left behind certain poetical works of theirs which also yield incidentally some information about them and their ancestors. The Subhadra-Dhananjaya-nataka, a Sanskrit play by Râmakavi yields the following genealogy:



It is stated in this work that the author was a native of Mulâṇdam in the Tundiramandala and that he belonged to the Kaśyapagótra. His ancestors were worshippers of Siva, and were called by the distinguishing title Aghôrasivacharya; these were held in great respect by Sârvabhaumakavi and others.

Again, in another work, the Sómavalli-yógánanda prahasana, its author Arunagiri gives his genealogy as follows:

 In Public domain. Digitization Muthulakshmi Research Academy



The Bhagavata-champu is another work written by Rajanathakavi, son of Sônagirinatha. The two kávyas, the Saluvábhyudayam and the Achyutarayabhyudayam, sung in praise of the deeds of valour of the Vijayanagara kings Sâḷuva Narasimha and Achyutarâya are claimed to have been composed by a poet called Rajanatha. In the former work the poet Rajanatha states that he was the son of Sônadrinatha; therein we see him bear a long string of birudas, rather high-sounding in their purport; they are:

1. Dindima-kavi Sarvabhauma, Dindimakavi Rajanatha.

2. Chêra-chôḷa-Pândya-prathamârâdhya Hridayasivâbhikhya Diṇḍimakavi-sârva bhauma-biruda Sônadrinathâtmaja Rajanâtha.

3. Dasarupa-Narayaṇa-biruda-manlana Dindima.

4. Rasika-kavitâsâmrajya Lakshmipati.

5. Navanåtåka-bharatacharya.

6. Kavimalla-galla-tâdana-patu.

7. Pratibhata-kavi-kuñjara-pañchânana.

8. Bindůdaka-kavi-prapitâ maha.

In Public domain. Digitization Muthulakshmi Research Academy

9. Kavisarvabhaumabdhi târâpati.

10., Chatur-vritti-Sârvabhauma.

11. Dvadasa-dêsya-vritti-paradriśva.

12. Ashṭabhâshâ-paramêsvara.

13. Abhinava-nataka-Bhavabhûti.

14. Maghadyati-varti-chitraprabandha-paramésvara.

15.Ashtadigvijaya-patahikrita-birudaDindimadambara.

16. Shadarsana Shanmukha.

17. Saiva-sastra-jivatu, and

18. Akhilavêda-sâgara-sâ myåtrika.

Of these a very large number of the birudas qualify Arunagiri or Sônådrinatha than glorify his son; the son born of the merits of such a great man as Arunagirisa who bore almost all the foregoing birudas, was Rajanathakavi, the author of the saḷuvabhyudayam. But in the Achyutaräyá-bhyudayam not even the name of the father of the poet is given ; one thing, however, is certain, namely, that the author of the Achyutarayabhyudayam and the Bhagavata Champu are identical, as will be observed from the introductory verses in both, extracts of which are given in the appendix; the authors of these two poems were the contemporaries of Achyutadêvaraya. The verse beginning with dhammilla-saiváladhara is found, without the least change, in both poems. From the facts detailed above some feel inclined to dissociate the two Rajanathas, the authors of the Saluvábhyudayam and of the Achyutarayabhyudayam and treat them as two different persons; there is also apparently some ground for their doing so, because, the one deals with the history of a king who lived at least 25 years earlier than the king whose exploits are recorded in

In Public domain. Digitization Muthulakshmi Research Academy

the second poem. It might also be stated that it cannot be that the title-less Râjanâtha (the grandfather of the highly-sounding titled Râjanatha, whose father's name even is not mentioned), was the author of the kávya dealing with a later king and his grandson, the composer of the kavya dealing with the history of the earlier king. One gets out of this difficulty, if one admits that the author of the Saluvâbhrudayam, the Achyutarayabhyudayam and the Bhagavata-champu was one and the same person, Rajanatha, the son of Arunagiri. If this conclusion is admitted, as it must be, the genealogy of the poets of Mullandram could be shown as related to that of the sásana writers of the Vijayanagara kings thus :



In Public domain. Digitization Muthulakshmi Research Academy

vamsavriksa

(Kasyapagôtra Götamagotra Abhirama Kaviprabhu, the opponent (Dindimaprabhu) of Någan pakavi SabhApati Abhiramanayika married to Rajanathadelika Ganaparya Svayambhu-married to Suster Kåmåkshi or Kamakoti Bonagiri or Arunagirinathe (possesso: several birudas) Kamaya Krishnakayi Ramakavi Rájanatha Ramakavi Rajanathakavi kavi (author of the Salu Subhadrd-vabhyudayam, the Dhanafijaya) Achyutaršydbhyuda yam and the Bhaga vatachampu). Sőmantha)

The identification of the sásana writers of the kings of Vijayanagara with the poets of Mullandram is based upon the following considerations:

(i) The poets of Mullandram and the sâsana writers of the Vijayanagara kings bear the same names.

(ii) They both have written the eulogies of the kings of Vijayanagara.

(iii) They both were the protégés of the Vijayanagara kings and possibly because,

(iv) as the poets, according to the Vivêkapatramålå were the followers of the Srikanthagama and bore the high-sounding title Aghôrasivacharyas, were able to induce the family guru of the Vijayanagara kings, Kriyâsakti Pandita to exert his influence with the kings to procure for them the hereditary position (mirasi) of the sasana writers of the kings.

The above are the only reasons which induced me to take the poets as identical with the sasana writers. How far this identification is tenable it is too much to say at present. Future research alone should bear out or contradict this identity.

In Public domain. Digitization Muthulakshmi Research Academy

As regards certain facts mentioned in the Viveka patramala, a few words of explanation are necessary. First, it is stated that the ancestors of the poets of Mullandram were originally the inhabitants on the banks of the Ganges and that when a Chóḷa king went on a pilgrimage to Benares, he met those learned men and took them with him and settled them in Toṇḍainâdu. If the statement is true, the Chola king is, as has been already remarked, Rajendrachôladeva I. who conquered all the countries as far north as the Ganges and as a consequence was better known as Gangaikondachôla. It was after his name the city of Gangaikonda. chôlapuram and the superb temple in its centre were constructed and the former made the capital by that king. This fact of his having brought some Saiva Brâhmaṇas of the Agamânta school on his way from the banks of the Ganges is also referred to in his work the commentary on the Siddhanta-Sârâvali of Trilochanaśivacharya by Anantasivacharya. And we know from the inscriptions of Rajaraja I. and his son Rajendracholadêva I. that they preferred the Brahmanas of Lata, Gauda, &c., countries to be mathadhipatis and půjaris in temples. Thus there is some truth in the statement made in the Vivêkapatramala.

The next fact stated therein is that the original immigrants into the Tondainadu were the followers of the Srikanthâgama. The present inhabitants of the village of Mullandram who trace their descent from the poets mentioned in the Viveka patramala now assert that they are not Âgamântins but Védântins belonging to the Vadama sect. One of them is to-day the guru of the oilmonger caste (Vaniyan). It is very hard to believe how they could have become Vadamas if they trace their lineage from persons who once bore the title of Aghorasivâchâryas.

In Public domain. Digitization Muthulakshmi Research Academy

Again, Mullandram is stated to have been the native village of Dindimakavi and that it also bore the name Praudhadevarayapuram. An inscription (No. 396 of the Madras Epigraphist's Collection for 1911) found in Mullandram "records that the Mahajanas of Praudhadevarayapuram alias Agaram-Mulandram including the poet Dindimakavi, assigned house sites to certain stone-masons in the Kaṇmâḷatteru. This charter was engraved on the temple of Tândônriśvaram-udaiyâr." This is dated in the cyclic year Raudra. Another record belonging to the same place (No. 397 of 1911) dated S. 1472, Sâdhârana records "Gift of land by a Brahmana lady to the shrine of Annamalainàtha built by her, in the temple of Svayambhunatha for the merit of herself and her husband Kumârar Dindimar Annamalainathar." If S. 1472 was Sâdhâraṇa, Raudra adjoining Sadharaṇa will be the Saka years 1423 or 1483, the earlier perhaps being more probable. From these two inscriptions we learn that the ages of the Kavi Dindima and perhaps of his son Kumarar Dindimar Annamalainâthar were about the middle of the 15th century of the Saka era which falls in the reign of the Vijayanagara king Achyutadêvaraya-a fact which clearly shows that the author or authors of the Saluvâbhyudayam, the Achyutarayabhyudayam and the Bhagavata-champu should necessarily have lived only in the reign of Achyutadêvarêya and not before. The inscriptions further inform us that another name of the village Mullandram was Praudha devarayapuram, as mentioned in the Vivêkapatramaia.

According to the Vedantadéšika Vaibhavaprakašika of Doddayacharya of Chôlasingapuram, Vedantadêsika, the great Visishtâdvaita Acharya, the founder of the Vadagalai sect of the Srivaishṇavas, is said to have had a philosophical wrangle with a Diṇdima-Sárvabhauma Kavi. This Dindima-

 In Public domain. Digitization Muthulakshmi Research Academy

Sarvabhauma Kavi is herein said to be the author of a work called Raghavábhyudayam and that to excel this composition Vedantadêsika is said to have written Yadavábhyudayam. We know from other sources that Védântadêśika lived for over a hundred years from S. 1191-1293 (=A.D. 1269-1371). Therefore, the opponent of the Srivaishnavacharya must be an ancestor of Aruṇagirinatha (in his mother's side).

Again, Nainarâchârya, the son of Vêdântadêśika, a contemporary, like his father, of Sarvajñasimha Nayaka, is reported to have defeated in a philosophical discussion a poet of the court of the prince above named, known by the appellation of Sakalya-Malla. This must be the Kavimalla who was overcome by Dindimakavi Aruṇagirinátha, as evidenced by one of his titles, Kavimalla-galla-tâdana-patu. The Vivékapatramála contains an absurd statement that Aruṇagirinâtha, incensed by the conduct of the keeper of the queen's garden near Mettaippadi, complained against him to the king Praudhadêvarîya and requested him to present him with the garden, so that he might construct there an agrahara, that Praurhadêvarêya refused to give it and that thereupon Arunagiri went to the Sultan of Delhi and got an order from the latter to Praudhadêvarêya to cede the garden in favour of the poet. Even supposing that the Sultan of Delhi is a mistake for the Sultan of one of the five kingdoms into which the Bahmani kingdom broke, we fail to understand what right the Sultan had to issue an order to be obeyed by Praudhadêvarêya and how the Vijaya nagara king endured the conduct of this most disloyal and dangerous poet and settled him down in the midst of his loyal subjects. But the village of Mullandram is actually called Praudhadevarayapuram, a fact which clearly bears out the fact that it was made an agrahara by Praudhadêvarêya. Perhaps it might be argued that after all,

In Public domain. Digitization Muthulakshmi Research Academy

it might be that the king first felt some difficulty in conferring his queen's garden to the Brâhman poet, but later on was pleased by his conduct and his learning to grant it to Arunagirinâtba. But this supposition cannot be upheld, because the age of Arunagiri is far behind that of Praudhadevaraya and therefore the one cannot be the donee and the other the donor. From all these petty contradictions and absurdities contained in the Vivékapatramála we can assert without fear of contradiction that the work is not one written in the life-time of Arunagirinatha but long after it, the chief source of information being the traditions current in the village of Mullandram at the time of its composition. A number of places, etc., occure in the Vivékapatramála; they are Rajanathapura, otherwise known as Talpagiri, the Talpagiri hill near the agrahára of that name, Audumbarapura and Navagrahara (N. grâma). These are absurd literal translations of the Tamil names Mettaippândi, Attiyûr and Puttur all three of which are in the Arni division of the North Arcot District. Mullandram is also there.

(I am indebted to Mr. T. S. Kuppusvami Sastri of Tanjore for the text of the Viveka patramála, as also the extracts from the Subhadra Dhananjaya Natakam, the Bhagavata-champu and the Somavali, Yogananda-prahasanam. He has also been kind enough to make several valuable suggestions.)

रूपकम्

डिण्डिमकविजीवनविशेषानाम् अध्ययनस्य अनन्तरमधुना सोमवल्ली योगानन्दमिति प्रहसनस्य विशेषाः विमृश्यन्ते।

 In Public domain. Digitization Muthulakshmi Research Academy

रूपकं दशधा भवतीति तेषु दशसु प्रहसनम् अन्यतमः रूपकभेद इति दशरूपककारः धनञ्जयः वदति[5]। कविकल्पितं निन्द्यचरित्रयुतं प्रहसनमिति दशरूपककारः प्रहसनस्य लक्षणं वक्ति। अङ्गिरसः हास्यः। एकाङ्कयुतः।

प्रहसनस्य भेदाः- शुद्धं वैकृतं सङ्करञ्चेति त्रेधा भवति प्रहसनम्। पाखण्डिनः विप्राः चेटाः चेट्यः विटाः इत्यादयः भवन्ति चेत् शुद्धमिति उच्यते।षण्डाः कञ्चुकिः तापसाः विटाः नटाः भटाः यत्र भवन्ति तत् विकृतप्रहसनमिति उच्यते[6]।

सोमवल्लीयोगानन्दम्– विकृतप्रहसनम्

अस्मिन् प्रहसने प्रधाननायकः योगानन्दनामा मस्करी (भिक्षुः) सोमवल्ली नाम कुलटा च नायिका। अन्यपात्रधारिणः सन्ति नग्नाटकः अथवा क्षपणकः जैनसन्न्यासी कापालिकः चेटः चेटी इत्यदयः अतः एतद् विकृतप्रहसनमिति वक्तुं शक्यते। नायिकानायकयोः नाम्ना एव प्रहसनस्य नामकरणं जातम्।

पात्राणि

1. सूत्रधारः	2. योगानन्दनामा मस्करी
3. योगानन्दस्य शिष्यः	4. दामोदरभट्टः
5. दामोदरभट्टस्य शिष्यः कलविङ्कः	6. वसन्तदत्तः
7. वसन्तदत्तस्य पत्नी कामवल्ली	8. हालिकः
9. तीर्थको नाम नग्नाटकः	10. मणिकिरणनाम्नः श्रेष्ठिनः कामवल्ली नाम चेटी कुट्टिनी

[5] दशरूपकम् 1-8, 11

[6] तत्रैव 3-49,50

In Public domain. Digitization Muthulakshmi Research Academy

11. कापालिकः	12. चेटः
13. सोमवल्ली महाराजपुरोहितस्य यज्ञदत्तस्य पुत्री माधवभट्टस्य गृहिणी	14. शूलमित्रः
15. नागरिकः	16. महाराजा
17. विदूषकः	18. कञ्चुकी

नान्दी- पूर्वरङ्गं विधायादौ सूत्रधारे विनिर्गते।

प्रविश्य तद्वदपरः काव्यमास्थापयेन्नटः[7]।

रूपकस्य द्विविंशतिः पूर्वाङ्गाः भवन्ति। प्रत्याहारः अवतरणम् आरम्भः आस्रावणम् वक्रपाणिः परिघट्टनं सङ्घट्टनं मार्गासारितं शुष्कावकृष्टं उत्थापनम् परिवर्त्तनम् नान्दी प्ररोचनं त्रिगतम् आसारितम् गीतं ध्रुवम् त्रिसामः रङ्गद्वारं वर्धमानकं चारिः महाचारिश्चेति।

नन्दी वृषः कोपि महेश्वरस्य रङ्गत्वमादौ किल खे जगाम। तद्रङ्गमुद्दिश्य कृतां तु पूजां नान्दीति तां नाट्यविदो वदन्ति। इति भरतः उवाच। तच्च क्रियारूपनान्दी वाग्रूपनान्दी चेति द्वेधा भवति। क्रियारूपनान्द्यां नन्दिपूजा क्रियते। वाग्रूपनान्दी नमस्कारवस्तुनिर्देशादिसमन्विता बहुविधा च भवति। नान्दी केन क्रियते इति विषये नाट्यदर्पणकारः वक्ति[8]।

नान्दी – मङ्गलश्लोकः

पूर्वं कृता मया नान्दी आशीर्वचनसंयुता।

अष्टाङ्गा पदसंयुक्ता प्रशस्ता वेदसम्मता इति भरतस्य वचनम्।

---

[7] द.श.3.

[8] नान्दीपाठकाश्च सूत्रधारस्थापकपारिपार्श्विकाः इति नाट्यदर्पणम् – चतुर्थविवेकः ।

In Public domain. Digitization Muthulakshmi Research Academy

कोहलस्य मतानुसारं नान्दी आशीर्नमस्क्रियारूपश्लोकः नान्दी भवति[9]।

नाटकलक्षणानि अनुसृत्य डिण्डिमकवि प्रसनस्यादौ आशीर्वचनसंयुतं मङ्गलश्लोकं व्यरचयत्।

पूर्वं पूरितरेतसश्शिखिमुखे शर्वादभूद्यस्ततः
शौरेस्स्त्रीवपुषः सरोजजनुषः पश्चात्सुताकामिनः।
स्वाराजात्तदनन्तरं मुनिवधूजाराप्रथप्रोद्गत
श्चण्डाशोर्बडबादृता दिशतु श्रेयांसि हास्यो रसः।।

पञ्चभिः श्लोकैः नान्दी प्रस्तुता। तदनु प्रस्तावना प्रस्तूयते।

प्रस्तावना- मधुरश्लोकैः रङ्गप्रसादनं विधाय ऋतुं कञ्चन आश्रित्य वर्णयति सूत्रधारः अथवा स्थापकः अथवा पारिपार्श्विकः। कथावस्तु पात्रप्रवेशः कविप्रशस्तिः इत्यादयः विशेषाः प्रस्तावनायां स्युरिति साहित्यकाराणां मतम्[10]। प्रसहनेस्मिन् त्रयोदशभिः श्लोकैः गद्यैश्च प्रस्तावना विहिता। प्रेक्षकाः शिवः डिण्डिमकविः वसन्तर्तुः प्रधाननायकस्य योगानन्दस्य वर्णनञ्च अत्र लक्ष्यन्ते[11]।

वसन्तर्तुः[12] नायिका सोमवल्ली[13] नायकः योगानन्दः[14]

---

[9] आशीर्नमस्क्रियारूपश्लोकः काव्यमुखोदितः।नान्दीति कथ्यते तस्यां पदादिनियमोपि वा।।
माङ्गल्यशङ्खचक्राब्जकोककैरवशंसिनी ।यत्राष्टभिर्द्वादशभिरष्टादशभिरेव वा।।
द्वाविंशत्या पदैर्वापि सा नान्दी परिकीर्त्तिता।

[10] रङ्गं प्रसाद्य मधुरैः श्लोकैः काव्यार्थसूचकैःऋतुञ्च किञ्चित्प्रायेण भारतीवृत्तिमाश्रितः।भारती संस्कृतप्रायो वाग्व्यापारो नराश्रयः। तस्याः प्ररोचना वीथी तथा प्रहसनामुखे अङ्गान्यत्र। साहित्यदर्पणम्

[11] सो.यो.10

[12] सो.यो.11

[13] सो.यो.18

In Public domain. Digitization Muthulakshmi Research Academy

भरतवाक्यम् - प्रशस्तिः- निर्वहणसन्धौ चतुर्दशाङ्गानि भवन्ति[15]। निर्वहणसन्धेः अन्तिमाङ्गे प्रशस्तौ भरतवाक्यस्य स्वरूपं सम्यक् दरीदृश्यते। संस्कृतरूपकेषु निर्वहणसन्धेः अन्ते नायकः फलं प्राप्य मोदं प्रकटयति। तदनु स्वदेशस्य स्वधर्मस्य स्वसंस्कृतेः सर्वतोमुखाय कल्याणाय शुभाशंसनं करोति। एतत् शुभाशंसनमेव भरतवाक्यमिति व्यवहियते। कदाचित् नायकस्य सहचरः ज्येष्ठः हितोभिलाषी अन्यः वा भरतवाक्यं प्रस्तौति। साहित्यशास्त्रग्रन्थेषु भरतवाक्यस्य लक्षणानीत्थं उल्लिखितानि।

नृपदेवप्रशान्तिः प्रशस्तिः। भरतः

प्रशस्तिः शुभशंसनम्। धनञ्जयः

नृपदेवादिशान्तिः प्रशस्तिः। विश्वनाथः

प्रशस्तिर्वीर्यविजयमङ्गलादिप्रशंसनम्। शारदातनयः

प्रशस्तिः शुभशंसनम् । रामचन्द्रगुणचन्द्रौ

प्रशस्तिः प्रोच्यते सा तु यच्छुभशंसनम्। अमृतानन्दयोगी

भरतैश्चराचराणामाशीराशंसनं प्रशस्तिः स्यात्। सिङ्गभूपालः

मङ्गलाशंसनं सम्यक् प्रशस्तिरभिधीयते। रूपगोस्वामी

प्रशस्तिः शुभशंसनम् - सर्वेश्वरः

प्रशस्तिः एव भरतवाक्येन प्रसिद्धिं गता। कान्तासम्मिततया काव्यं उपदिशति सहृदयहृदयम्। यद्यपि नायकस्य वा अन्यस्य वा मुखात्

---

[14] सो.यो.19

[15] दशरूपकम्

In Public domain. Digitization Muthulakshmi Research Academy

भरतवाक्यम् उच्यते तथापि इदं वाक्यं कवेः भवति। भरतवाक्यात् कविहृदयः ज्ञातुं शक्यते। भरतवाक्येन कविजीवनसमकालिकान् राजनैतिकसामाजिक सांस्कृतिकचारित्रकान् विशेषान् ज्ञातुं प्रभवामः।

सोमवल्लीयोगानन्दस्य भरतवाक्यम्

प्रहसनस्यान्ते महाराजस्याज्ञया सोमवल्लीयोगानन्दौ गृहस्थाश्रमं प्रविशतः। प्रसन्नः योगानन्दः राजानं स्तौति। विदूषकोपि राजानं स्तौति। राजस्तुतिपरकाः षट् श्लोकाः भरतवाक्यायन्ते[16]। डिण्डिमकविः प्रहसनस्य भरतवाक्ये स्वशासकस्य स्तुतिं विदूषकनायकयोः मुखात् चाकर। लोकस्य कल्याणमपि कामयामास इति वक्तुं शक्यते।

कथावस्तु - योगानन्दनामा मस्करी (भिक्षुः) सशिष्यः रङ्गस्थलं प्रविशति। पूर्वेद्युः अन्योन्याङ्गस्पर्शे सति सोमवल्ल्याः सात्त्विकविकारः जातः। तस्याः समागमोपायः कः इति स्वशिष्यं पृच्छति। तदा शिष्यः अवदत् यत् सापि तव भावं जानाति। चिन्तितमात्रोपलब्धा भविष्यति। आचार्यमनोरथं स्वयमेव सफलं रचयिष्यति। अहमेव घटयामि। सा अद्यैव विरूपाक्षाराधननिमित्तं तुङ्गातटमागमिष्यतीति श्रुतम्। झटिति तामुपसर्पामि। सोमवल्ल्याः उपगमनात् पूर्वं मस्करी योगानन्दः उपाध्यायं दामोदरभट्टं वणिक्पुत्रं वसन्तदत्तं हालिकं नग्नाटकं कामवल्ली नाम्नीं चेटीं कापालिकञ्च पश्यति।

दामोदरभट्टस्य वृत्तम् - मार्गे शिष्येण निर्दिष्टं दामोदरभट्टं मस्करी वर्णयति। पूर्वेद्युः आतिथ्यपुरस्कृतेन केनापि धूर्तेन कृतानुषङ्गा मम गृहिणी निशायां पलायिता इति दामोदरभट्टः खेदम् अनुभवति। दामोदरभट्टस्य शिष्यः कलविङ्कनामा अतिरोषणत्वेन उपाध्यायी पलायिता किमिति पृच्छति। पर्वणि

---

[16]सो.यो. 92-97

In Public domain. Digitization Muthulakshmi Research Academy

दिवापि सङ्गः पापमिति स्मृतिवचो यदि वदामि। पीडां भजेयमिति साध्युपेक्षितान्येन भुज्यमानापि इति दामोदरभट्टः पलायनस्य हेतुं वदति। मस्करिणः हितवचनं श्रुत्वा अन्यसङ्गोन्मुखीं सुमुखीं निवारयामि इति उक्त्वा दामोदरभट्टः सशिष्यः ततः निष्क्रान्तः।

वसन्तदत्तस्य वृत्तम् - वीथिकायां कलकलः श्रुतः। तत्र वसन्तदत्तः अक्षिगोचरः जातः। वाराङ्गनायाः कामवल्ल्याः पुरः स्थापितेन नापितेन सह वर्त्तते वणिक्कुमारः वसन्तदत्तः। मया कलत्रीकृतापि कुलटेयं व्यभिचारं विहितवती। दण्डनरूपेण मुण्डनं कारयामि। अस्याः शिरः वापयितुमुद्यतोस्मीति वदति वसन्तदत्तः। कामवल्ल्याः सखीमाणिक्यवल्ली नाम्नी वाराङ्गनामुख्या मध्येसभं मण्डलनृत्तकाले गलपाशयोगात् प्राणान् अमुञ्चत् इति उक्त्वा ततः निर्गच्छति।

हालिकवृत्तम्- ततः तत्रागतः हालिकः मस्करीं वदति। किमिदम् अन्याय्यमिति। नारीमविश्वस्य मम अपराङ्गे कृत्वा सदा क्षेत्रं कृषामि। तथापि कश्चित् कपटः सहायः तां खण्डितसच्चित्रां विहितवान्। क्रन्दन्ती मम सुन्दरीं विहाय पलायतयोः धूर्तयोः पदपङ्क्तिरत्र दृश्यते। मस्करी तम् आश्वासयति। यदि दृष्टिगोचरौ तर्हि तौ दण्डयामि। कृषेर्विघ्नः कुतः क्रियते। तद्गच्छ इति हालिकम् असूचयत्। हालिकः निष्क्रान्तः।

नग्नाटकवृत्तम् - तीर्थको नाम नग्नाटकः कश्चन जैनसन्न्यासी। कामवल्ली काचित् कुट्टिनी।ततः तीर्थको नाम नग्नाटकः कामवल्ली नाम चेटी च प्रविशतः। नग्नाटकः तया निरुद्धमार्गः दृश्यते। अस्मानपि एषा बलाकृत्य कण्ठे गृह्णीयताम्। अस्याः मार्गं परिहरामः इत्युक्त्वा मस्करी ततः अपसरति। नग्नाटकः मम मार्गं मुञ्च इति चेटीम् आदिशति। यदा सा तम् आलिङ्गति तदा

In Public domain. Digitization Muthulakshmi Research Academy

नग्नाटकः चतुर्विंशतितीर्थकाराधनपवित्रं मम शरीरं दूषयसि इति भर्त्सयति। कपटजैन इति तं सम्बोधयति चेटी। मणिकिरणनाम्नः श्रष्ठिनः कामवल्ली नाम कुट्टिनी एषा केनापि कापालिकेन कलत्रीकृता इति शिष्येण पृष्टः मस्करी तस्याः चेट्याः परिचयं वदति।

पणं देहि मम मुखगतं ताम्बूलं भक्षयेथाः इति चेटी कथनं तिरस्कृत्य नग्नाटकः वदति जैनाः चेटीमुखोच्छिष्टताम्बूलं भक्षयन्ति किम् इति। सुरापानमत्तेन नग्नाटकेन कृतमविनयं स्मारयित्वा प्रत्यारक्षकैः गाढं बन्धयित्वा सुरतपणं दापयिष्यामीति चेटी नग्नाटकं भर्त्सयति। नागरिकाणां समक्षं मया कृतमविनयं मा प्रकाशय इति सम्प्रार्थ्य चेटीमनुसरति सः। नग्नाटकं मलिनयन्तीं चेटीं विलोकयति मस्करी। यावत् कापालिकः आगमिष्यति तावत् झटिति सुरतपणं देहीति चेटी गमनार्थम् उद्युक्तं नग्नाटकं पृच्छति।

कापालिकवृत्तम् - कपालहस्तः कापालिकः सचेटः प्रविशति। सुरापानमत्तः वल्मीकं दृष्ट्वा सर्पम् उदध्त्य भैरव इव नागभूषणो भवामीति वदति कापालिकः। निवारयति चेटे कापालिकः वदति वल्मीकरन्ध्रेण पातालललोकं प्रविश्य नागराजाय मदिरां प्रदाय प्रणिपद्य तस्मात् आज्ञां विषह्मीमथ निस्सरामः इति। चेटः तं निवारयति। यदि पालातगमनं नानुमन्यसे तर्हि आकाशगमन माचरामीति मुहुर्मुहुरुड्डीयोड्डीय पतति कापालिकः। चेटः पुनः तं वारयति। कापालिकः कामवल्लीं स्मरति। स्वाभिमुखम् आयान्तं सुरापानमत्तं विलोक्य मस्करी काषायेणावकुण्ठितस्तिष्ठति।

मत्तः कापालिकः मस्करिणमेव स्वकान्तां मत्त्वा प्रलपति। अवकुण्ठितमुखी एषा मम प्रिया कुपितेव अन्यत्र गन्तुमीहते इति मत्त्वा मस्करिणं कण्ठे गृह्णाति। चेटः तं निवारयति। मस्करी आक्रन्दति। मत्तः

In Public domain. Digitization Muthulakshmi Research Academy

कापालिकः तव दासोहमिति प्रलपति। तव भार्या क्षपणकेन सह वर्त्तते इति मस्करी कापालिकं निवेदयति। योगानन्दनामा मस्करी अहमिति स्वपरिचयं प्रस्तौति। चेटीं दृष्ट्वा मस्करिणं विहाय सरोषम् अभिपतति कापालिकः। मस्करी निभृतः तिष्ठति। पलायमानं नग्नाटकं प्रथमं दण्डय इति चेटस्य कथनमनुसृत्य कापालिकः शुनकाय छोटिकां ददाति। भीतः नग्नाटकः निरुद्धस्तिष्ठति। एषः नग्नाटकः स्वभावमुग्धः तपस्वीति एनं मुञ्चेति चेटः कापालिकम् अनुनयति। चेटस्य वचनेन कापालिकः नग्नाटकं विहाय चेटीमालिङ्ग्य प्रसन्नः सन् मधुपानाय प्रचोदयति। नग्नाटकः कापालिकं हितम् उपदिशति। क्रुद्धः कापालिकः सुखलेशविवर्जितं क्षपणकाचारं मुञ्चेति नग्नाटकं बोधयति। तस्मात् भीतः नग्नाटकः मदिरां सेवते। चेटी क्षपणकमालिङ्गति। तदनु कापालिकः क्षपणकमादाय चेटीचेटाभ्यां चण्डिकायतनं गच्छति।

तेषां गमनोत्तरं मस्करी तच्छिष्यश्च तुङ्गातटस्य वाटिकां गच्छतः। ततः सोमवल्ली प्रविशति। आनन्दपारवश्येन मस्करी तामालिङ्गति। तुङ्गापरिसरे विरूपाक्षाराधननिमित्तं जनाः सञ्चरन्ति इति तौ निवारयति शिष्यः। सोमवल्ली ततः निष्क्रान्ता। योगानन्दशिष्ययोः संल्लापः संवृत्तः यस्मिन् व्याकरणवैशेषिकन्यायसाङ्ख्यपूर्वमीमांसोत्तरमीमांसादर्शनानां विशेषाः निर्दिष्टाः। सोमवल्लीनिर्दिष्टसङ्केतस्थलं प्रतस्थे योगानन्दः। गृहीतपुरुषवेषा सोमवल्ली निशायां योगानन्दम् अन्विष्यति। योगानन्दशिष्यः खड्गहस्तः पुरुषः अत्रोपस्थितः इति योगानन्दं सूचयति। कस्त्वं खड्गेन त्वां खण्डयामीति योगानन्दः भर्त्सयति। सोमवल्ली मनसि किमपि विचार्य भद्रकाली अहम्। मां निवारयितुं को वा निपुण इति उक्तवती। शिष्यः भीत्या नगररक्षकान् आह्वयति। तदा ससम्भ्रमा सोमवल्ली योगानन्दाय निजपरिचयं ददाति।

In Public domain. Digitization Muthulakshmi Research Academy

आसन्नरक्षकान् वीक्ष्य ते व्याकुलाः भवन्ति। सोमवल्ली खड्गेन देहत्यागं कर्तुम् इच्छति। योगानन्दः तां निवारयति।

शूलमित्रप्रमुखा नागरिकाः ततः प्रविशन्ति। शूलमित्रस्य आज्ञया शिष्यः सोमवल्लीयोगानन्दयोः परिचयं वदति। शूलमित्रः तौ बध्नाति। कपटवेषधारिणः सन्न्यासिनः वधूः वञ्चयन्तीति शूलमित्रः योगानन्दं निन्दति। नागरिकाः तौ दूषयन्ति।

तदा विदूषकेन सह महाराजः तत्र प्रविशति। शूलमित्रः रामसमक्षं तौ प्रस्तौति। तयोः दण्डनार्थं राजानं विज्ञापयति। महाराजस्य परिचितपूर्वः योगानन्दः। महाराजपुरोहितस्य यज्ञदत्तस्य पुत्री माधवभट्टस्य गृहिणी सोमवल्ली च। राजानुज्ञया मस्करी योगानन्दः गृहस्थाश्रमं प्रविशति। योगानन्दः विदूषकश्च राजानं स्तुवतः। मस्करिणः भरतवाक्येन प्रहसनमिदं समाप्तिम् एति।

छन्दोवैशिष्ट्यम् - अस्मिन् प्रहसने अनुष्टुप् इन्द्रवज्रा उपेन्द्रवज्रा पृथिवी शार्दूलविक्रीडितं स्रग्धरा द्रुतविलम्बितं वसन्ततिलका आर्यादि वृत्तैः उपनिबद्धास्सन्ति उपशतं श्लोकाः। श्लोकानुक्रमणिकायां वृत्तविवरणमपि प्रस्तूयते।

अलङ्कारवैशिष्ट्यम् - शब्दालङ्कारार्थालङ्कारमण्डितमिदं प्रहसनं सहृदयहृदयं चमत्करोति नूनम्[17]।

---

[17] सो.यो.12

In Public domain. Digitization Muthulakshmi Research Academy

रसः - नवरसभेदेषु अन्यतमः हास्यरसः। हासः एव स्थायिभावः विभावादिभिः पुष्टः हास्यत्वमागतः विदूषकादिरालम्बो भावो हास्यरसे यथा इति अलङ्कारसङ्ग्रहः।

हास्यरसः - अङ्गिरसः

रसस्तु भूयसा कार्यः षड्विधो हास्य एव तु। इति दशरूपकग्रन्थेपि उक्तत्वात् प्रहसनेस्मिन् हास्यरसः अङ्गिरसः इति निश्चप्रचं वक्तुं शक्यते। डिण्डिमकविः मङ्गलश्लोके हास्यरसमेव उल्लिखति[18]।

स्त्रीनीचप्रकृतावेषभूयिष्ठं दृश्यते रसः।
षड्भेदाश्चास्य विज्ञेयाः तांश्च वक्ष्याम्यहं पुनः।।

स्मितमथ हसितं विहसितमुपहसितं चापहसितमतिहसितम्।
द्वौ द्वौ भेदौ स्यातामुत्तममध्याधमप्रकृतौ[19]।।

अस्मिन् प्रहसने कापालिकस्य चेष्टाः हास्यरसान्विताः। मदिरापानमत्तः कापालिकः सर्पाकुलं वल्मीकं प्रवेष्टुम् इच्छति स्म। पातालालोकं गत्वा नागेन्द्रं सुरां पाययितुं चेष्टते स्म। आकाशगमनमीहते स्म। उड्डीयोड्डीय निपतति सः।

भृङ्गिरिटिः

नाट्यशास्त्रपरमगुरुः शम्भुः। तस्य प्रमथगणाः हास्यरसस्य अधिष्ठानदेवताः[20]। रससिद्धये रसाधिदेवताः पूज्याः। शारदातिलकग्रन्थ

---

[18] सो.यो.1, 8.

[19] ना.शा.6.51,52

[20] शृङ्गारो विष्णुदेवत्यो हास्यः प्रमथदैवतः।रौद्रो रुद्राधिदैवत्यः करुणो यमदैवतः।
वीभत्सस्य महाकालः कालदेवो भयानकः।वीरो महेन्द्रदेवः स्यादद्भुतो ब्रह्मदैवतः।। (ना.शा.6.44, 45)

In Public domain. Digitization Muthulakshmi Research Academy

व्याख्याने शैवद्वारपालेषु भृङ्गिरिटिः अन्यतमः इति उल्लिखितम्। अतः अत्र कविः प्रमथगणेषु अन्यतमं भृङ्गिरिटिम् उल्लिखति[21]।

भाषाशैली

रूपकसाहित्ये भाषाशैली कीदृशी स्यादिति धनञ्जयादयः साहित्यग्रन्थकाराः सुष्ठु प्रतिपादिवन्तः[22]। स्त्रीपात्राणि प्राकृतभाषया व्यवहरेयुः। अधमाः पुरुषाः शौरसेनीप्राकतभाषया व्यवहरेयुः संस्कृतप्राकृत भाषामयं प्रहसनमिदं दशरूपक ग्रन्थलक्षणानि अनुसरति। दशरूपक ग्रन्थोक्तदिशा डिण्डिमकविः पुरुषपात्राणां वाग्व्यापारं संस्कृतेन प्रदर्शितवान्। नीचपुरुषपात्राणां विदूषकचेटादीनां वाग्व्यवहारस्तु प्राकृतेन विहितः। स्त्रीपात्राणामपि वाग्व्यवहारः प्राकृतेन निरूढः। प्राकृतपाठ्यमालिकायां प्राकृतस्य सप्तप्रभेदाः निर्दिष्टाः। मागधी अवन्ती प्राच्या शौरसेनी अर्धमागधी बाह्लीका दाक्षिणात्या चेति। नाट्यशास्त्रेपि सप्तैव निर्दिष्टाः[23]।

डिण्डिमकविः प्रहसनेऽस्मिन् शौरसेनीप्राकृतस्य प्रयोगं कृतवानिति वक्तुं शक्यते। यद्यपि कथावस्तुदृष्ट्या तावन्न विशेषः तथापि काव्यतत्त्व विश्लेषणदिशा संस्कृतप्राकृतभाषाप्रयोगवैशिष्ट्यदृष्ट्या प्रहसनमिदं रूपकसाहित्ये विशिष्टं स्थानं भजतीति उक्तौ नास्ति अतिशयोक्तिलेशः।

---

[21] अथ नन्दिमहाकालौ गणेशवृषभौ पुनः। ततो भृङ्गिरिटिः स्कन्दः पार्वतीशश्च सप्तमः ॥
चण्डेश्वरोऽष्टमः शैवा द्वारपालाः क्रमादमी। (शारदातिलकम् 1-14 श्लोकः 8 व्याख्या)

[22] देशभाषाक्रियावेषलक्षणाः स्युः प्रवृत्तयः। लोकादेवावगम्यैता यथौचित्यं प्रयोजयेत्।।
पाठ्यं तु संस्कृतं नृणां अनीचानां कृतात्मनाम्। लिङ्गिनीनां महादेव्या मन्त्रिजा वेश्ययोः क्वचित्।।
स्त्रीणां तु प्राकृतां प्रायः शौरसेन्यधमेषु । । (दशरूपकम् – द्वि.प्र.)

[23] मागध्यवन्तिजा प्राच्या शूरसेन्यर्धमागधी।
बाह्लीका दाक्षिणात्या च सप्तभाषाः प्रकीर्तिताः। ना.शा. 17-48

In Public domain. Digitization Muthulakshmi Research Academy

कार्त्तज्ञ्यसमर्पणम्

सोमवल्लीयोगानन्दमिति प्रहसनम् हस्तलिखितमातृकाग्रन्थः तेलङ्गाणासर्वकारीयप्राच्यलिखितग्रन्थालयः परिशोधनालयश्च इति संस्थायाः सम्प्राप्तः। मातृकाग्रन्थस्य प्रतिं प्रदाय निस्तुलमुपकृतवद्भ्यः उपर्युल्लिखितस्य कार्यालयस्य निदेशकमहाभागेभ्यः डाँ. पि. सुब्बारावर्येभ्यः ग्रन्थालयस्य संस्कृतपरिशोधनाधिकारिण्यै श्रीमत्यै टि. अरुणामहाभागायै सस्नेहं कृतज्ञतां निवेदयामि। यस्य प्रचोदनेन मातृकाग्रन्थस्य सम्पादने आमुखलेखने च साफल्यं प्राप्तं तस्मै संस्कृत अकाडमी कार्यालयस्य निदेशकाय प्राचार्याय के.नीलकण्ठमहाभागाय सविनयं कार्तज्ञ्यं समर्पयामि। आमुखलेखने साहाय्यम् आचरितवतः विदुषः जोशी भरद्वाजस्य अभिवृद्धिं कामयमानाऽहं तम् अभिनन्दामि। मातृकाग्रन्थस्य क्लिष्टम् उट्टङ्कनकार्यम् अङ्गीकृत्य माम् उपकृतवते श्रीमते सामलमोहनमहाभागाय कृतज्ञतां समर्पयामि। उस्मानिया विश्वविद्यालयस्य उपकुलपतिभ्यः प्राचार्येभ्यः डि. रवीन्दर महाभागेभ्यः केन्द्रीयसंस्कृतविश्वविद्यालयस्य उपकुलपतिभ्यः श्रीनिवास वरखेडि महोदयेभ्यश्च कार्तज्ञ्यम् आविष्करोमि।

इति बुधजनविधेया
डाँ के. वरलक्ष्मीः
उपनिदेशिका

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS
CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri Sarayu Trust. Funding by MoE-IKS
In Public domain. Digitization by eGangotri and

In Public domain. Digitization Muthulakshmi Research Academy

बाहुमूलरोमसव्यथलज्जितकुपितबालविधवाजनकोलाहलमुखरित दिङ्मुखे महोत्सवे,

पण्यस्त्रीगृहमेधिनः परवधूस्वीकारनारायणाः
पुंसम्भोगमहेश्वरा गुरुवधूभोगक्षपाकामुकाः ।
एकस्त्रीरतिपाण्डवा हयवधूरागग्रहाधीश्वराः
पुत्रीकामपितामहाः कथममी सभ्यास्समभ्यागताः ॥6॥

इतश्च

मणितस्वरमन्त्रपाठकानां महिलाराधननित्यकर्मठानाम् ।
महती परिदृश्यते सभेयं मदनब्रह्मविदां महाजनानाम् ॥7॥

(सर्वतः पश्यन्) अये समागतमनङ्गागमकनकनिकषपाषाणैर्मणित सीत्कारादिमन्त्रावर्तनमान्त्रिकैरक्षद्यूतरदक्षैः विविधकरणकुशल वेश्यायत्तैः अभिसारिका शारिकाशुकैः पुष्पिणीपुष्परसपुष्पन्धयैर्विधवासुरतविज्ञान-बादरायणैः परदार भोगरसानुभूतिपरिभूतपुरुहूत प्रशस्तिविस्तारैस्सभास्तारैः। तदमीषां पुरतः किमप्येकं रूपकमभि नेतव्यमिति-

(कर्णं दत्वा) किं ब्रूथ

यादृशरसप्रयोगाद्भृङ्गिरिटिर्नाट्यशास्त्रपरमगुरोः ।
शम्भोः प्रसादभूमिस्तादृशरूपो रसोऽभिनेतव्यः ॥8॥

इति, किं तादृशम् ।

(विमृश्य) अस्ति खलु नरेन्द्राग्रहारनायकमणेः सामवेद सांयात्रिकस्याष्टभाषा कवितासाम्राज्याभिषिक्तस्य बल्लाळराय कटककविकुल-गर्वपर्वतपवेर्नागनकवि नागकेसरिणः श्रीकविप्रभोः पौत्रः पुत्रः श्रीराजनाथ-देशिकस्य ब्रह्माण्डभाण्ड पिचण्डमण्डलित विजयडिण्डिमरवचण्डिम्नः श्रीकण्ठागमशिखण्डमण्डनमणेः श्रीडिण्डिमप्रभोः दौहित्रः श्रीमदभिराम-नायिकाम्बास्तनन्धयः सभापति भट्टारकाचार्यभागिनेयः श्री डिण्डिमकवि-

In Public domain. Digitization Muthulakshmi Research Academy

सार्वभौम इति प्रथितबिरुदनामा सरस्वतीप्रसादलब्धकवितासनाथः श्रीमानरुणगिरि नाथः । तेन कृतेन सोमवल्लीयोगानन्दनाम्ना प्रहसनेन सभानियोग- मनुतिष्ठामि,

(विमृश्य)

स्त्रीत्वं प्राप हरिर्भगप्रणयनव्यग्रः स्वचित्ते दध-
त्स ब्रह्मा मृगतां गतो मृगमयीं लब्धुं स्वकन्यामपि ।
ताभ्यां शूर्पणखा सुयोधनविकाराभ्यां कृतं येन त-
द्वैदेहीद्रुपदात्मजातनुजुषा रक्षः कुरुध्वंसनम् ॥9॥

अहो फलितं मलिनं कर्म ,

कविः स्वयं डिण्डिमसार्वभौमः संसद्गुणैकग्रहणोन्मुखीयम् ।
अस्मिन् प्रबन्धे विनयप्रगल्भाःवयं च नाट्यैककलाविदग्धाः ॥10॥

इहहि –

नवनवरमणपराणां नग्नङ्करणो दिवापि नारीणाम् ।
प्राप्तो वसन्तदिवसः पञ्चायुधपश्यतोहरसहायः ॥11॥

अत्र खलु –

पूगाः पुञ्जितपुष्पधूलिशिरसो राजन्ति लीलावने
गोपस्त्रीनवनीतशीकरमिलन्मन्थानदण्डोपमाः ।
किञ्चैते वकुलद्रुमस्य मुकुलाश्शाखानुशाखोदिताः
व्यावृण्वन्ति मसूचिकाप्रतिनवस्फोटावली विभ्रमम् ॥12॥

(अन्यतः पश्यन्) इयं खलु चूतलता,

मधुपरवमणितमुखरा मारुततरलप्रवालकरशाखा ।
कोकिलशिरसि विधत्ते दृष्टा पञ्चाङ्गुलीक्षेपम् ॥13॥

अपि च –

शैत्ये शनैस्ताम्यति गाढतापाः स्तनोत्तरीयं श्लथयन्ति कान्ताः ।

In Public domain. Digitization Muthulakshmi Research Academy

अतः परं कैश्चिदहोभिरेताः प्रियोत्तरीयाण्यपि संत्यजेयुः ॥14॥

(विमृश्य)

मधुकरसमवायो मादृशैर्वर्ण्यते किं
कुरवककुसुमानां रेणुना रञ्जिताङ्गः ।
शिशिरसमयवैरिक्ष्मापकान्ताक्षितारा-
निचय इव सरक्तोत्पादितो माधवेन ॥15॥

(पुनर्विभाव्य)

कुन्दप्रसूनान्नंभरे क्रमेण दुर्भिक्षतां यान्ति पुनर्द्विरेफाः ।
संप्रत्यमी चूतमरन्दधाराचमूषमास्वादयितुं यतन्ते ॥16॥

(विमृश्य)

मत्तेन कृत्ते मधुनापि तेन पुराणपत्रोच्चयशीर्षरोम्णि ।
अङ्गस्रुतं रक्तमिवावहन्ते कङ्केलयः कन्दलितप्रवालाः ॥17॥

(स्पर्शसुखमभिनीय)

मरुदयमलिनानुगम्यमानो मुखरयता निनदेन दिङ्मुखानि ।
तरुणविटपिसक्तसोमवल्ली स्मररसकण्टककृत्समागमेन ॥18॥

(परिवृत्यावलोक्य) एष च योगानन्दनामा मस्करी,

करात्तदण्डः कलितोर्ध्वपुण्ड्रः काषायवान् कक्षविलम्बिरोमा ।
सहैव शिष्येण धृतासनेन पद्भ्यां समायाति सपादुकाभ्याम् ॥19॥

(इति निष्क्रान्तः)

In Public domain. Digitization Muthulakshmi Research Academy

।। प्रस्तावना ।।

(ततः प्रविशति योगानन्दनामा मस्करी शिष्यश्च)

मस्करी –

शक्यो हि सोढुं सुरतोपयोगिताम्बूलमाल्याभरणाद्यभोगः ।
नमत्सु नारायणशब्ददानादहर्निशं शीर्यति हन्त शीर्षम् ॥20॥

(विभाव्य) शिष्यं प्रति –

पूर्वेद्युरन्योन्याङ्गस्पर्शे सति शिष्यस्य च तस्याः सोमवल्ल्याः सात्विकविकारो महानासीत् । वत्स किं तदा दृष्टवानसि ।

शिष्यः – (किं न दिट्ठ परपुरुस समा अमभीदाइ विअ कंपिदाइताए अंगाइ, णिन्तचुक्तअमत्तधाराविगळिआसेअधारा, मअणणअरप्पवे-सूतद्दुब्भवधु स्सक्कुलिअ दिट्ठा कड्ढअक्कुरा।) किं न दृष्टं परपुरुषसमागमभीतानीव कम्पितानि तस्या अङ्गानि, चुलकपेयामृतधारेव गलितास्वेदधारा ।

मस्करी –

को वा तत्समागमोपायः किं वा सा मय्यनुरक्ता ।

शिष्यः- (अळं संस एण तुह भावं विजविदिव्वेतिं, ता तुज्झ चिन्तिदमे त्तोपळद्धाभविस्सदि) । अलं संशयेन, तव भावमपि सा विजानाति, तत्तव चिन्तित मात्रोपलब्धा भविष्यति ।

मस्करी – यदुक्तं त्वया –

विद्योतयन्ती मनसो विकारं व्रीडागतेनापि गता मृगाक्षी ।
विलासभाजा शफरी सलीलव्यावर्तमानेन विलोचनेन ॥21॥

शिष्यः – (ताआआरि अ मणोरहं सा सअं एव्व सफलं र अइस्सदि)

तदाचार्य मनोरथं सा स्वयमेव सफलं रचयिष्यति ।

मस्करी – कोवान्योन्याभिप्रायं स्पष्टीकरिष्यति ।

In Public domain. Digitization Muthulakshmi Research Academy

शिष्यः – (अहं एव्व तंअवगमिअ घड एमि) । अहमेव तमवगम्य घटयामि ।
मस्करी – यद्येवं फलितं मनोरथद्रुमेण । कदा वा सा त्वयाऽभिगम्या।

शिष्यः – (अज्ज एव्व विरूपाच्छाराहणणिमित्तं तुंगातटं आअमि-स्सदित्ति सुदं मए) । अद्यैव विरूपाक्षाराधननिमित्तं तुङ्गातटमागमिष्यतीति श्रुतं मया।
ता झत्ति उपसप्पामि , [तज्झटित्युपसर्पामि]

मस्करी – अहमप्यागच्छामि (उभवापि परिक्रामतः)

मस्करी – (पुरोऽवलोक्य) विवृतदशनकिरणावली दरीमुखीव वृवेलेयमालक्ष्यते, तथाह्येषा –
विधुफलेन सहैव वियत्तरोर्विधुततारककोरकजालका ।
पिककुलाकुलकूजितकैतवात् किलकिलारवमातनुते किल ॥22॥

(परितोऽवलोक्य)
काकाः मज्जनमाचरन्ति पयसि व्याधूतपक्षाञ्चलाः
श्वानो वर्ष्म धुवन्त्यमी चभसिताकीर्णं प्रसुप्तोत्थिताः ।
पृष्ठं लाभपरायणाः पतिमुखे कुर्वन्ति कोकाङ्गनाः
साशङ्कं प्रविशन्ति कोटरगृहं क्षोणीरुहां कौशिकाः ॥23॥

(विचार्य)
सन्ध्याशुन्यास्थिलेखा मुख इव कलिता प्रागियं श्वेतभासा
नक्षत्रस्फोटपीडां शमयति नभसो वासरारम्भवैद्यः ।
कर्षन् शङ्खप्रणादं मरुदयमधुना मङ्क्षु सुप्तोत्तिताना-
माशावेश्याङ्गनानामवशभर इवाधो मरुत्सन्निधत्ते॥24॥

(परिक्राम्यावलोक्य)
आदानोत्क्षेपणैरर्घ्यमपामञ्जलिभाजनैः ।
नतोन्नता वितन्वन्ति तुलायन्त्रोपमा द्विजाः ॥25॥

In Public domain. Digitization Muthulakshmi Research Academy

(पुरोऽवलोक्य)

स एष समुदयति ब्रह्माण्डतिमिररोमावरोपणग्रामणीर्ग्रहग्रामणीः ।

अधुना हि नूतनदिनाधिनायक-
प्रणतिक्रमावनमदुन्नमन्मुखः ।
वसुधासुधाशनजनो धुनीतटे
बहुधा दधाति कृकलासखेलनम् ॥26॥

अपि च –

स्वप्नेऽङ्गनास्वैररतच्युतेन स्वरेतसा विच्छुरितं यतीन्द्राः ।
कौपीनमासिच्य कराञ्चलेन सन्ताडयन्त्यत्र शिलातलेषु ॥27॥

(निमित्तं सूचयन्)

फेरुर्वाशितमातनोति तनुते घूकः स्वयं घूत्क्रियां
वामं क्रन्दति हन्त गर्दभयुवा श्वा मूत्रयत्यग्रतः ।
नाग्रे तैलवणिङ् न कोऽपि विनसो नो कोष्टवीन क्षुतं
तस्माद्दर्शयति श्रुवं सुशकुनं तस्याः पुनर्दर्शनम् ॥28॥

शिष्यः –(हद्धगदस्स किं स उणेण) हस्तगतस्य किं शकुनेन ।

मस्करी –

पुष्पकलनाभिरामा पुन्नागलतेयमञ्चितोत्कलिका ।
उत्कृत्यते तमालकमुपरि गतातः स्वयं सा मे ॥29॥

शिष्यः – (केण उवाएण उवज्झा अस्स अण्णसंकंतं हि अअं करंमि)
केनोपायेनोपाध्यायस्यान्यसंक्रान्तं हृदयं करोमि ।

(परिक्रम्यावलोक्य) (एदं णिरुवेदुं उ व ज्झाओ)

एतन्निरूपयतूपाध्यायः

(करकळिअदण्डकट्ठो वाळेण शिरोगदेण चूडाळो ।
वाणरिगवेसणपरो परिखिजं जरठमक्कटो एदि) ॥

In Public domain. Digitization Muthulakshmi Research Academy

छाया- करकृतकलितदण्डकाष्ठो वालेन शिरोगतेन चूडालः ।
वानरीगवेषणपरः परिखिद्यन् जरठमर्कट एति ॥30॥

मस्करी- (विभाव्य)

विलम्बिकूर्चो विवृतोर्ध्वपुण्ड्रः पङ्गुः स्खलन् पाणिगृहीतदण्डः ।
दामोदरो गर्वितपूर्वचूडः कक्षे वहन् पुस्तकमभ्युपैति ॥31॥

(प्रविश्य)

दामोदरभट्टः –पूर्वेद्युरातिथ्यपुरस्कृतेन केनापि धूर्तेन कृतानुषङ्गा ।
पलायिता मद्गृहिणी निशीथे पश्येयमेनामपि नाम भूयः॥32

(आकाशे लक्ष्यं बद्धा)

पुष्पेक्षणे पुष्पवतीमपीत्वा बहिर्वसन्तीं बत वीतनिद्रः ।
द्वित्राण्यदृष्ट्वैव दिनान्यतिष्ठं कुत्रासि देशे कुलधर्मपत्नी ॥33॥

हन्त शिष्यो न सहागतः । (उपरि प्रविश्य)

शिष्यः – (उवज्झाअ अहिवादेमि) उपाध्यायाभिवादयामि।

दामोदरभट्टः – वत्स कलविङ्क आयुष्यतस्करो भूयाः ।

शिष्यः – (कहं विसादमळिन नदमुहेण विडं – बिअदि गोलंगुठत्तणं उवज्झाएण)
कथं विषाद मलिननतमुखेन विडम्ब्यते गोलाङ्गूलत्वम् उपाध्यायेन ।

दामोदरः – किं न जानासि जननी ते जारसंगतेति ।

शिष्यः – (तुज्झ जणणी खुरज्झाकुट्ठिणी) तव जननी खलु रथ्याकुट्टिनी।

दामोदरः – मामैवम् । पितृस्थानीयस्य मे भार्या तव जननीपदमर्हतीति
विविक्षितं मया ।

शिष्यः – (ससान्त्वनम्) (उवज्झाअ सहेदु मे मन्दबुद्धित्तणं)
उपाध्याय सहस्व मे मन्दबुद्धित्वम् ।

In Public domain. Digitization Muthulakshmi Research Academy

(किं उण कहेहि कुदो गदा उवज्झई) किं पुनः कथय कुतो गता उपाध्यायी।

दामोदरः – इयक्षोर्मे यज्ञविघ्नमन्तरेण कारणान्तरं न पश्यामि ।

शिष्यः – (णिणिधि अणुवट्टणं दुक्करि हो इ, अदिरोसदित्तरणेण किमुवज्झाई पळाइ दा) रूप्यनुवर्तनं दुष्करं भवति। अतिरोषणत्वेन किमुपाध्यायी पलायिता।

दामोदरः – किमेवं वदसि, शान्तप्रकृतिं मां न जानासि ।

पश्य –

पर्वणि दिवापि सङ्गः पापमिति स्मृतिवचो यदि वदामि ।
पीडां भजेयमिति साध्युपेक्षितान्येन भुज्यमानापि ॥34॥

मस्करी – (आकर्ण्योपसर्पति)

शिष्यः – (उवज्झायेण अणुमदं अण्णसंगित्तणं अणुमदं खु दिणे कहंति, अपुण्णकंमळिदम्) उपाध्यायेनानुमतमन्यसङ्गित्वमनुमतं खलु कथमपि अपुण्य-कश्मलितम् ।

दामोदरः – (स्वगतम्)

घृतशौचविधिः कृतः कलास्याच्छ्रुतिमार्गात्सवनक्रियाप्यदोषा ।
प्रथमं सवनस्य मे समाप्तं द्रविणं द्वादशभारलब्धमर्घे ॥35॥

मस्करी – (उपसृत्य) महाब्राह्मण इयक्षोस्तवापर्युषितघृतशौचे कृते तस्या-महाद्रव्यव्ययहेतुमन्यसंगं परिहरस्व ।

दामोदरः – तथाहमन्यसङ्गोन्मखीं सुमुखीं निवारयामि ।

(इति सशिष्यो निष्क्रान्तः)

मस्करी – (सानुस्मरणम्)

हरिद्रागन्धिलौ कक्षौ घ्रायं घ्रायं मुदाधरम् ।

 In Public domain. Digitization Muthulakshmi Research Academy

पायं पायं पुनश्चास्या लभेयं भगचुम्बनम् ॥36॥

किं चास्या भैक्षदानाय मठसमागतायाः

विगलितधम्मिल्लभरं विचलत्ताटङ्कमतितरलहारम् ।
वेल्लदुरोजमुदञ्चज्जघनं वीरायितं जयत्यन्तः ॥37॥

(परिक्रम्य) क एष वीथिकायां कलकलः ।

(सप्रत्यभिज्ञम्) सोमवल्ल्या वाराङ्गनायाः पुरः स्थापितेन नापितेन सह वर्तते वणिक्कुमारो वसन्तदत्तः ।

(उपसृत्य) वसन्तदत्त

किमात्थ –

व्यभिचारं विहितवती मया कलत्रीकृतापि कुलटेयम् ।
दण्डो मुण्डनमस्यास्तस्माद्वापयितुमुद्यतोऽस्मि शिरः ॥38॥

इति । अशास्त्रीयमिदम् ।
कृतागसामेव किलाप्रदण्डमष्टादशापि स्मृतयो वदन्ति ।
ननु स्थिते सागसि नाभिमूले मूर्ध्नः कुतो मुण्डनमायताक्ष्याः ॥39॥

तद्धुनाऽस्याः

राकाचन्द्रविनिन्दकास्यविसरन्मन्दस्मितज्योतिषां
रोहैरुद्यतचामरं घनकुचोत्तुङ्गासनालङ्कृतम् ।
दण्डाग्रोल्लसितातपत्रितभगं नाभीकळाचीयुतं
साम्राज्यंमकरध्वजस्य सुचिरं वीरायितं त्वाऽवतु ॥40॥

पुनः किमात्थ, परिगृहीतं गुरुवचनमिति, साधु साधु, अस्याः सखी कुत्र वसति? किमात्थ, भगवन्

मध्येसभं मण्डलनृत्तकाले माणिक्यवल्ली किल वारमुख्या
उत्सृज्य सश्वासमधस्समीरं प्राणानमुञ्चद्गलपाशयोगात् ॥41॥

In Public domain. Digitization Muthulakshmi Research Academy
इति । अहो अन्यादृशं व्यवसितं मानिनीनाम् । तिष्ठ तु साधयामः ।

(प्रविश्य)

हालिकः – मुने किमिदमन्याय्यम् ।

मस्करी – किं तत्

हालिकः –

नारीमविश्वस्य ममापराङ्गं कृत्वा निशां क्षेत्रमहं कृषामि ।
तथापि तां खण्डितसच्चरित्रां कश्चिद्वितेने कपटस्सहायः ॥42॥

मस्करी – कथमिव

हालिकः –

न्यस्य क्वापि पटावृते विटमसौ स्त्री मे प्रसूत्यातुरा
पश्यैनां प्रियया तवेति वचसा धूर्तस्य सा प्रेषिता ।
क्रन्दन्तीमपि तां पुमानिति विटे स्वीकुर्वति स्वेच्छया
पुत्रः पुत्र इहाजनीति कपटान्मां सस्वजे तत्सुखात् ॥43॥

मस्करी - ततः

हालिकः - ततोऽति मात्रं क्रन्दन्तीं मम सुन्दरीं विहाय पलायितयोस्तयो
धूर्तयोः पदपङ्क्तिरत्र दृश्यते।

(मस्करी) - यदि ते दर्शनगोचरौ तौ दण्डयामि युक्तैर्दण्डैः तन्मारुति
निगृहीतेऽपि त्वया दुर्ग्रहौ धूर्तौ तद्गच्छ किं क्रियते कृषेर्विघ्नः।

हालिकः – तथा (इति निष्क्रान्तः)

मस्करी – (निर्वर्ण्य परिक्रम्य)

(नेपथ्ये)

अब्रह्मण्यमब्रह्मण्यम्, नमस्तीर्थकेभ्यः ।

 In Public domain. Digitization Muthulakshmi Research Academy

नग्नाटकः –

एषा पापीयसी चेटी सर्वदा लाभलोलुपा ।
रन्तुं निषेधति पुरो गर्हणीयं यथार्हताम् ॥44॥

शिष्यः – (भअवं किं एदं) भगवन् किमिदम् ।

मस्करी – एष तीर्थको नाम नाग्नाटकः कयाऽपि निरुध्दमार्गो दृश्यते। तस्मादस्मानप्येषा वलात्कृत्य कण्ठे गृह्णीयात्। तदस्यास्सरणिं परिहरामः ।

(ततः प्रविशति तीर्थको नाम नग्नाटकः कामवल्ली नाम चेटी च)

नग्नाटकः – (शिखिपिञ्छिकया चेटीं प्रेरयन्) पापे मुञ्च पन्थानम् ।

चेटी – (णग्ग धुत्त ण मुंचामि मग्गं, किं सिहिपिंछिआए मेहनं ढक्केसि)।
नग्न धूर्तन मुञ्चामि मार्गम् , किं शिखिपिञ्छिकया मेहनं छादयसि।
इति शिखिपिञ्चिकयापसार्यालिङ्गति।

नग्नाटकः –

अरे रण्डे चतुर्विंशतितीर्थकाराधनपवित्रं मे गात्रं दूषयसि ।

चेटी - कपटजइण सुणादु दाव –

कुडिकंचिसमुदवळ्ळह वअणे वामं गिगुमसि मे जीवो ।
इचि स नहि उणाणं स ए मप्पणिदेसि संपदं केण॥45॥

कपटजैन! शृणु तावत् ।

नग्नाटकः – (कर्णौ पिधाय) पिशाचिके किमापादयसि।

शिष्यः – (भअवं का णाम एसा) भगवन् का नामेषा।

मस्करी – इयं मणिकिरण नाम्नः श्रेष्ठिनः कामवल्ली नाम कुट्टिनी, या किल कलत्रीकृता केनापि कपालिकेन

शिष्यः – (ता इदो भ अवं दिवाभीदो विअणिक्कुदो को हेदु धुत्त किं तिद्दआणं

In Public domain. Digitization Muthulakshmi Research Academy

णमक्को करियदि । णउण मह) -तदितो भगवन् दिवाभीतो भवतु। धूर्त किं तीर्थकानां नमस्कारःक्रियते।

नग्नाटकः – (स्वगतम्)

आलिङ्ग्य साधून् समयोपपातैरालक्षकैर्बन्धयतीति सैषा ।
आकर्णितं यत्तदिहाद्य दृष्टं हा हन्त निन्द्योऽस्म्यहमार्हतानाम्॥46॥

चेटी – (धुत्तं किं घुरघुरा असि) धूर्त किं घुरघुरायसे ।

(संस्कृतमाश्रित्य)

किं दातुमिच्छसि पणं कितवावतंस
सद्यस्स देहि यमिनामसि चक्रवर्ती ।
आहोस्विदस्मि तव दास इति ब्रुवाण-
स्ताम्बूलमाननगतं मम भक्षयेथाः॥47॥

नग्नाटकः –

ताम्बूलकथनस्यापि प्रायश्चित्तं कृतं परम् ।
जैनाश्चेटीमुखोच्छिष्टताम्बूलं भक्षयन्ति किम् ॥48॥

चेटी – (तह जइदे अविण्णादपुरुसाइद पडिच्छचं अविणअपूव्वं रइदं पअसं उण अरक्ख एहि गाढं बन्दिअ सुरदप्पणं दापइस्सं ।) तथा यदि ते अविज्ञातपुरुषायित अविनयपूर्वं रचितम्।प्रत्यारक्षकैर्गाढं बन्धयित्वा सुरतपणं दापयिष्यामि।

नग्नाटकः – (स्वगतम्) मत्तेन मया पूर्वकृतं कथयत्येषा ।

(प्रकाशम्) कल्याणि मया कदा कृतम् । कीदृशेन स्खलितम् ।

चेटी – (पुव्वणिसा ए एव सुरापाणमत्तेण तुए)

पूर्वनिशायामेव सुरापानमत्तेनत्वया-

नग्नाटकः – अयि नार्हसि ममाविनयमद्य प्रकाशयितुम् इतस्ततस्सञ्चरन्ति नागरिकाः ।

In Public domain. Digitization Muthulakshmi Research Academy

चेटी – (तह जइ मं अणुवट्टेहि) तथा यदि मामनुवर्तय।

नग्नाटकः – तथा करोमि ।

चेटी – (आलिङ्गति)

मस्करी – (निर्वर्ण्य)

अहो पवित्राण्यङ्गानि पिच्छिलानि मलोच्चयैः ।
पाषण्डस्य परं चेटीपयोधरनिपीडनात् ॥49॥

एषा हि –

शिरसि प्रहरति मुष्ट्या ताम्बूलरसेन रञ्जयत्यधरम् ।
उरसि विदधाति ताडनमुज्झितलज्जेयमुन्मदा चेटी ॥50॥

नग्नाटकः – हन्त सम्यगनुभूतमखिलेन्द्रियसौख्यम् ।
भद्रे मुञ्च ममाङ्गानि क्रियतां जीविते दया ।
यः कोऽपि यावन्नेक्षेत तावद्गन्तुं प्रसीद मे॥51॥

चेटी - (धुत्त झत्ति देहि मे सुरदप्पणं जाव कापाळिओ आअमिस्सदि)
धूर्त झटिति देहि मे सुरतपणम् । यावत्कापालिक आगमिष्यति।
(ततः प्रविशति कपालहस्तः कापालिकश्चेटश्च) ।।

कापालिकः – (मदमभिनीय)

प्रदक्षिणयते नभस्सह भुवा प्रसादाय मां
(चषकमालोक्य)
द्रुतं मधुनि साम्प्रतं रविरनुप्रविश्यास्थितः ।
(उदरं परिमृज्य)
ममाग्निरयमान्तरश्चषकशीधुशोषी रिपुं
(स्पर्शसुखमभिनीय)
सुरापरिमलं हरन्मरुदयं दुढं बध्यताम् ॥52॥
(मधुनि स्वबिम्बमलवोक्य)

In Public domain. Digitization Muthulakshmi Research Academy

क एष परिघूर्णयत्यरुणमीक्षणं लीलया

(अङ्गुल्या लोडयन्)

द्रुतं क्व स पलायितः

(करमुपसंहृत्य स्तिमितं पश्यन्)

पुनरयं पिबत्यादरात्।

(पुनस्तमुद्दिश्य)

हरिस्त्वमसि चेदजस्त्वमसि चेत्पलायस्व मे
विहाय चषकं स्वयं त्वमसि भैरवश्चेत्पिब ॥53॥

(वल्मीकं दृष्ट्वा चेटं प्रति)

वत्स अस्मात् फणिकुलमुद्धृत्य भैरव इव नागभूषणो भवामि।

चेटः – (घोरा पिसा इमे दसंति दन्दसूआ) घोरा इमे दशन्ति दन्तशूकाः।

कापालिकः – (विभाव्य प्रहसन्)

वल्मीकरन्ध्रेण वयं प्रविश्य पाताललोकं फणिनायकाय।
प्रदाय शीधुं प्रणिपद्य तस्मादाज्ञां विषघ्नीमथ निस्सरामः॥54॥
(इति वल्मीकरन्ध्रे मुखं प्रवेशयितुमिच्छति)

चेटः – (आपिहा सामिअं किं एद्ध पाणं मुंचसि। हतोऽसि। सुरादेवि तुह विआरो एसो) स्वामिन् किमत्र प्राणं मुञ्चसि हतोऽसि, सुरादेवि तव विकार एषः।(इति कापालिकमुत्थापयति)

कापालिकः – किमाक्रन्दसि, यदि पातालगमनं नानुमन्यसे, तदाकाशगमन-माचरामि।

(इति मुहुर्मुहुरुड्डीयोड्डीय पतति)

चेटः – (अलं स्वामिणि आआसगमणेण, एव्वं पउत्तेण सामिणाभग्गसरीरेण, आआसगमणं एव्व सज्झइ) अलं स्वामिन्नायासगमनेन, एवं प्रवृत्तेन स्वामिना भग्नशरीरेणायास गमनमेव साध्यते।

 In Public domain. Digitization Muthulakshmi Research Academy

कापालिकः – (स्मरणं नाटयन्) सदानुपश्यामि कामवल्लीम् ।

मस्करी – मत्तोऽयमायाति । तत्काषायेणावकुण्ठितस्तिष्ठामि ।

कापालिकः – (तामेव स्वकान्तामवगम्य सानन्दम्)

पुंभावस्य तपःफलं स्मरपुरी प्राधाभिघातध्वनौ
वर्षाभ्वे सरमापराङ्मुखरतौ सद्यो रतोः कुक्कुटी ।
क्रीडाकोटरभूर्नखव्रणकिणालीनां दशार्घध्वनि-
क्ष्वेडास्वारभटी निरर्गलगलत्काणेषु पारावती ॥55॥

तामिमामन्विष्यामि । (इति परिक्रामति)

चेटी – (अज्ज विं मं ण याणादि परवसो एसो) अद्यापि मां न जानाति परवश एषः।

कापालिकः - (पुरोऽवलोक्य)

सौषावकुण्ठितमुखी कुपितेवान्यत्र गन्तुमीहते ।
(सत्वरमुपसृत्य मस्करिणं कण्ठे गृह्णाति)

(चेटः)– (अविह्व – (उपसृत्य) एसो कोवि मत्तोसिरिप्पादं चेटित्ति करिअ कौसिओ विअ अरिद्धं कण्ठे पीडेइ) एष कोऽपि मत्तः श्रीपादं चेटीं कृत्वा कौशिक इवारिष्टं कण्ठे पीडयति

मस्करी – मञ्च मुञ्च नाहं तव प्रेमभाजनम् ।

कापालिकः - (सानुनयम्)

अयथातथं किमपि चिन्तयत्यये
मम मानसं च कलुषीकरोषि किम् ।
तव दास एष हि सरोजलोचने
रचयाङ्कपालिमिह चक्रितस्तनम् ॥56॥

मस्करी – एषा खल्वन्या तव भार्या क्षपणकेन सह वर्तते ।

In Public domain. Digitization Muthulakshmi Research Academy

कापालिकः – त्वां विना का वान्या, स्वप्नेऽपि चित्तमयसे त्वमेव हि तथैव च ।

मस्करी – अहं पुनर्योगानन्दनामा मस्करी ।
आलिङ्गितक्षपणकां स्वभार्यामपि पुरःस्थितां पश्य ।

कापालिकः – (चेटीं दृष्ट्वा मस्करिणं विहाय सरोषमभिपतति)

चेटी – (क्षपणकं विहाय सभयं स्थिता) क्षपणकस्तु पलायितः ।

मस्करी - यावन्निष्क्रामोऽस्य मत्तस्य तावल्लतान्तरे निभृतावस्थानमेव स्थाने ।
(तथास्थितौ)

कापालिकः – अयि पण्यधर्षणि एवं कृत्वापि गृहीतपातिव्रत्येव किं मां
विलोभयसे (इति प्रहर्तुमिच्छति) ।

चेटः – (तं गृहीत्वा) (भट्टारअ पव्वाअमाणं इमं गेह्हिअ पच्चा भट्टिणीं सेक्खेटा)
भट्टारक पलायमानमिमं गृहीत्वा पश्चाद्भट्टिनीं शिक्षय।

कापालिकः –तदनेन सारमेयेण निरोधयाम्येनम् ।
(सारमेयाय छोटिकां ददाति) (सारमेयस्तदनुसरति)

नग्नाटकः – (सभयम्) अब्रह्मण्यमब्रह्मण्यम् । नमो नमोऽर्हद्भ्यः । एष हि –
विवृतवदनलक्ष्यदन्तशङ्कुर्विसृमररोमविकारभीषणाङ्गः ।
कवलयितुमितोऽनुधावते मां शशमिव रोषवशेन सारमेयः ॥57॥
(इति निरुद्धस्तिष्ठति)

कापालिकः – (अनुसृत्य प्रहर्तुमिच्छति)

चोटः – (भो मुंचेहि णं एसो सहामुद्धो नग्गो तवस्सित्ति) भो मुञ्चैनम्, एष
स्वभावमुग्धो नग्नस्तपस्वीति।
(किं वि मए विप्परुद्धो ता अअं अण्णहा हिअए करिअ) किमपि मया
विप्रलब्ध स्तदयमन्यथा हृदये कृत्वा।

कापालिकः – (चेटीमालिङ्ग्य) तस्मै प्रसन्नोऽस्मि भो तपस्विन् पिबचषकमधु ।

 In Public domain. Digitization Muthulakshmi Research Academy

नग्नाटकः – (समाश्वस्य)

भद्रमतीमीदृशं त्यज परमिह जानासि समयमस्माकम् ।
अनुरम मांसमहीं सनमदारसङ्गमादिमलम् ॥58॥

कापालिकः –

दत्ता सुराऽस्माभिरियं त्वया चेन्नाङ्गीकृता नग्नपिशाच सद्यः ।
निस्त्रिंशकृत्तं नियमोपहारं करोमि शीर्षं तव भैरवस्य॥59॥

नग्नाटकः – अहिंसा परमो धर्मः मर्षय मर्षय महाभाग ।

कापालिकः – मुञ्च मुञ्च क्षपणकाचारं सुखलेशविवर्जितम् ।

तथाहि ---

स्थित्वा काकवदन्नपिण्डकवलीकारः करेणैकदा
पानीयग्रहणं कदाचन मलप्रच्छादनीयं वपुः ।
केशोल्लुञ्छनपीडनं किमपरं ब्रह्मत्रयीदूषणं
नो भूतं न भवन्न भावि कुशलं किञ्चिद्यदि श्लाघ्यते॥60॥

चेटः – (को लङ्घितुमरुहसि तुमं भट्टिणो आदेसं, जहि तुह जीविदासा) न लङ्घितुमर्हसि त्वं भट्टारकस्यादेशं, यदि जीविताशा]

नग्नाटकः – (विमृश्य) भद्रे त्वां विना का वान्या मम हितोपदेशकारिणी। भद्रसमयं ते प्रविष्टोऽस्मि जिघांसा यदि मुञ्चसि । सुरां देहि किमन्यस्मै भैरवोऽपि प्रसीदतु । (इति पादयोः पतति)

कापालिकः – (चेटकरात्सुरामादायार्पयति) पायं पायमहो स्वादुता सुरायाः।

(सर्वे पिबन्ति)

चेटी – (क्षपणकाय पीतशेषमर्पयित्वालिङ्गति)

कापालिकः – अद्य चण्डिकायै नर्तनं प्रवर्तयितुं चण्डिकायतनमेव गच्छामः।

नग्नाटकः – अहो आलिङ्गनसुखमिति।

In Public domain. Digitization Muthulakshmi Research Academy

कापालिकः – (क्षपणकमादाय चेटीचेटाभ्यां सह निष्क्रान्तः)

मस्करी – (शिष्यं प्रति) दिष्ट्या निष्क्रान्ता एते ।

शिष्यः – (अज्ज पत्तजीविआ अं हो) अद्य प्राप्तजीविताः वयम् ।

मस्करी – (ऊर्ध्वमवलोक्य) अये गगनमध्यमलङ्करोति छायादेवीसुरतगुरुः।

आलोकितुमिवाशासु प्रसृतान्निशि गोगणान्निजान् ।
आरोहति वियद्विष्ण्यमयमद्य गवां पतिः ॥61॥

सम्प्रति हि –

स्त्रीणां स्वेदकणा गलन्ति मणिवद्दोर्मूलशुक्त्यन्तरा-
द्वल्मीकं प्रविशन् फणी वितनुते स्त्रीपुंसयोगभ्रमम् ।
गाढव्याप्तदलान्यमूनि दधते पद्मानि भास्वत्करो-
न्मेढ्रोलोडनकेलिविस्तृतनलिन्युत्तानयोनिश्रियम् ॥62॥

अपि च –

पारावतमिथुनानां प्रासादविटङ्ककोटरगतानाम् ।
रणितं गुरुजनसंसदि भणितं संस्मार्य लज्जयन्त्यबलाः ॥63॥

तदिह –

तुङ्गातटस्य वाटिकां गच्छामः (उभौ परिक्रामतः)

मस्करी – (निर्वर्ण्य)

कीलग्रासरसं निरस्य विहरन् पादान्तरच्छायभा-
गुड्डीय क्रमते बकः प्रतिजलाधारायतीनां गवाम् ।
उच्छिद्य प्रणयादुदुम्बरफलं निर्भिद्य वक्त्रानिलैः
स्वैरोज्जापितजन्तु नन्दति चरन् गोपालकानां व्रजः ॥64॥

कुत्र वा तां पश्यामि (सानुस्मरणम्)

In Public domain. Digitization Muthulakshmi Research Academy

दोर्मूलेन नखाङ्किते प्रतिमुहुश्चुम्बन् प्रवालाधरं
पायं पायमुरोजकुम्भयुगलीमालिङ्ग्य गाढं मुदा ।
तस्या मञ्जुलरोमशैवलवृते योन्यम्बुजाते लस-
त्प्रोत्तुङ्गाङ्कुरबीजकोशरुचिरे भृङ्गो भवेयं कदा ॥65॥

शिष्यः – (आ अरिअ तह एव्व सिद्धिस्सदि) आचार्य तथैव सिद्धिष्यति।

(परिक्रामति)

(ततः प्रविशति सोमवल्ली)

सोमवल्ली – (सोत्कण्ठम्) (कहं पेक्खामि भअवंतं) कथं प्रेक्ष्ये भगवन्तम् ?

दीसइ पुणोवि ज इ सो सण्णासि सरसकेळि वनानि ।
मण्णे मह उणपळिदं जंमत्तपुण्णकोटीहिम् ॥

दृश्यते पुनरपि यदि स सन्न्यासी सरसकेळिवनानि ।
मन्ये मम पुनः फलितं जन्मान्तरपुण्यकोटीभिः ॥66॥

(सनिर्वेदम्)

एसह्मि पत्थयन्ती मक्खरिणी परमदुळ्ळहा दाणिम् ।
अजविसणपदणवाच्छां मुञ्चन्ती विअदजीविदा जा दा ।।

एषास्मि प्रार्थयन्ती मस्करिणं परमदुर्लभमिदानीम् ।
अजवृषणपतनवाञ्छां मुञ्चन्ती विगतजीविता जाता॥67॥

मस्करी – (दृष्ट्वा) इयं हि –

तुलसीमणिदामशोभमाना स्तनभाराधिकतान्तमध्यदेशा ।
अलिकर्पितमृत्तिकोर्ध्वपुण्ड्रा हरते मानसमायतेक्षणा मे ॥68॥

(मदनावस्थां विलोक्य) अहो मदनोन्मादोऽस्याः –

जृम्भते सह वदत्यचेतनैर्वेपते स्वपिति वीक्षते दिशः ।
अन्तरीयमधिकं निपीड्यत्यङ्गुलीभिरनुरागिणी मयि ॥69॥

In Public domain. Digitization Muthulakshmi Research Academy

सोमवल्ली –

का ळज्जा का भीती का उण आअरिअसिस्सधंमकह ।
दिट्टो स यदि दुट्टो संदाणं करेमि बाहुपासेण ॥

का लज्जा का भीतिः का पुनराचार्यशिष्यधर्मकथा ।
दृष्टस्स यदि दुष्टस्सन्धानं करोमि बाहुपाशेन ॥70॥

मस्करी - अवसरोऽयं दर्शयितुमात्मानम् (उपसृत्य)

अयि वत्से) इत्यर्धोक्ते) प्रिये

अकरग्रहमधरग्रहमभूषणोपल विमर्दमाश्लेषम् ।
वितर मम तत्वविद्ये ब्रह्मानन्दमनधीतवेदान्तम् ॥71॥

(इत्यालिङ्गति)

शिष्यः–(आआरिअ अळं मदणोण्मादेण, इदो तुङ्गापरिसरंमि विरुपच्छांराहण णिमित्तं अविरदं संचरन्ति जणा) आचार्य अलं मदनोन्मादेन, इतस्तुङ्गापरिसरे विरूपाक्षाराधननिमित्तमविरतं सञ्चरन्ति जनाः।

सोमवल्ली - (सत्वरं निष्क्रान्ता)

मस्करी–अहो वृथाश्लेषणवितीर्णपरमानन्दा सैषा उपनिषदिव भूयो मदनावस्थामोहान्तर्हिता ।
(परिक्राम्यान्यतः पश्यन्)

अत्र क्रुश्चते विदुषां सभेयम् । अनया सह निजविद्यामुद्योतयन् दिवसशेष-मतिवाह्य निजमनोरथसिद्धिं भजामि ।

शिष्यः – (तह एज्ज करणिज्जं , अज्ज एव्व तुह सग्गेण अहं वि पण्डिदोऽह्मि) तथैव करणीयम् , अद्यैव तव सङ्गेनाहमपि पण्डितोऽस्मि]

मस्करी – तत्प्रळिकार्धमावेदय

अम्भोदं न नभस्स्थलं सरसिजामोदोत्तरङ्गो रसो

 In Public domain. Digitization Muthulakshmi Research Academy

गम्भीरं नखलूपपानमुदयत्पुष्पं नलीनां वनम् ।
दण्डक्षोभसहं नदत्यतितरां कण्डूकरं न व्रणं
लेह्यं नो मधु यद्युगान्तमपि संवर्ते न चाकाङ्क्षते ॥72॥

शिष्यः – (विमृश्य) ही ही नाहिमूलं , नाभिमूलम् ।

मस्करी – (शिष्याय काषायमर्पयति)

शिष्यः – (तुमं सिरीपादोवि सिंग्गारगहीरोऽसि) त्वं श्रीपादोऽपि शृङ्गार गम्भीरोऽसि।

मस्करी – वत्स न किं शृङ्गाररसो देवेष्वपि श्वश्रूस्वीकारकरणो न किं नारायणः दुहितृधर्षणपरो हि न किं द्रुहिणः । अहल्याभिसरणोद्यमो न किं वासवः।गुरुदारानुभूतिमहिमकरो न किं हिमाकरः, बडबानिधुवनकरो न किमहिमकिरण।तपोधनवनितारतोन्मना न किं दमुनाः। कन्दलितवधूसुरतोल्लासो व्यासः ।

अथवा –

वसिष्ठागस्त्ययोर्वेश्याजननीजनकौ पुनः ।
द्वौ मित्रावरुणौ हन्त तथापि मुनिपुङ्गवौ ॥73॥

शिष्यः –(भअवं किमदिपदिदो लोको) भगवन् किमपि पतितोलोकः।

मस्करी –

स्त्रियस्सर्वाङ्गतो मेध्या इति कृत्वा मनीषिणः ।
सर्वाण्यङ्गानि चुम्बन्तो न दूष्यन्ते हि योषिताम् ॥74॥

शिष्यः – (उवज्झाअगदं किं वि सद्धगतं सोदुमिच्छंमि) उपाध्यायगतं किमपि शब्दगतं श्रोतुमिच्छामि।

मस्करी – कथय तावत् ।

शिष्यः –(एद्ध दांव अकारो विवुदो संवुदो वा) अत्र तावदकारः विवृतस्संवृतो वा

मस्करी – विवृतः प्रवृत्तिसमये तदभावे संवृतः पुनरकारः तत्रोदाहारणतया

In Public domain. Digitization Muthulakshmi Research Academy

पुल्लिङ्गं निर्दिशन्ति विद्वांसः ।

शिष्यः –(कीरिसो णाम वैसेसिअपआरो) कीदृशो नाम वैशेषिकप्रकारः।

मस्करी –

न्यायः काणादशास्त्राणां संशयो निर्णयोऽपि वा ।
श्रुत्वा स्वच्छन्दचारिण्या पातिव्रत्यं तु साध्यते ॥75॥

शिष्यः – (अच्चलियं सेरिणीए पदिव्वदत्तणम् , तदो) आश्चर्यं स्वैरिण्याः पतिव्रतत्वम् , ततः-

मस्करी – इयं कापिली शैली

वेश्या यथा हि धूर्तानां द्वितीयानिलमोक्षणे ।
मानेन न पश्यति तथा पृष्ठे प्रकृतिरात्मनि ॥76॥

शिष्यः – (कीरिसी वा पुव्वमीमांसा) कीदृशी पूर्वमीमांसा मस्करी

शब्दः प्रयोजयति केवलमात्मकार्ये
वाच्यं न किञ्चिदपि तस्य न वाचकत्वम् ।
आकर्णितो हि भणितध्वनिरङ्गनानां
चेतो यथा नयति योनिमुखं विटानाम् ॥77॥

शिष्यः- कहं वैयासिअं [कथं वैयासिकम्]

मस्करी –प्रपञ्चो नितरां मिथ्या सर्वं ब्रह्मेति सुस्थितम् ।
यदा ब्रह्मपरिज्ञानमिदं भावः कुतस्तदा ॥78॥

(सोमवल्लीमुद्दिश्य)

विविधविटवरोपभोगिनीनां हरिणदृशां चरितं न दूषणं स्यात् ।
तरुणवृषसहस्रधर्षिणीनां भवति कथं सुगवां प्रभावहानिः ॥79॥

शिष्यः – (भअवं प्रमाणचूळामणी होसि)

भगवन् प्रमाणचूडामणिर्भवसि

 In Public domain. Digitization Muthulakshmi Research Academy

मस्करी – (समन्तादवलोक्य) अये चरमगिरिनितम्बं चुम्बति मार्ताण्डः ।

तथाह्यद्य

निर्गन्धान्विनिवेश्य वीवधपुटेष्वायान्ति दाशा झषान्
श्रृङ्गाटे विलुठन्ति पान्थवणिजामाक्षिप्तभाराः खराः ।
केचिद्रोधसि केपि मूर्ध्नि दधतो यज्ञोपवीतं चिरा-
दाकण्ठस्नपनं जले द्विजविटा नग्ना इमे कुर्वते ॥80॥

तथाह्यद्य रजन्याम् –

धूर्ताः स्त्रीवेषभाजस्तमसि विषमके संज्ञया विप्रयूनो
मुग्धानाकार्य पूर्वं कलितरतिपणा जीर्णकुड्यालयेषु ।
ओष्ठं संचुम्बयन्तः करकलितशिखा मूर्ध्नि कृत्वा दशार्धं
तेषामास्येषु शेषांस्यहह पुनरमी स्वानि कृत्वा लभन्ते ॥81॥

अपि च –

शिष्येषु प्रपथं विदग्धविधवा वर्गस्य संप्रेषिते-
ष्वाह्वानाय चिरायितेष्वपि किं साशङ्कमानाः स्वयम् ।
पश्यन्तः पदवीममी क्षपणकामस्त्यस्य जालान्तरे
निर्वेदेन नमो नमोऽर्हत इति व्याहारमातन्वते ॥82॥

(प्राचीमवलोक्य) अ समुदितप्रायश्चन्द्रः ।

अयं हि –

सुरपतिमहानसगृहे स्वैरं सम्प्राश्य भाण्डगतमन्नम् ।
धारयति तन्मषीमिव सोमः स्ववपुषि कलङ्कदम्भेन ॥83॥

शिष्यः – (कुह) कुत्र

मस्करी – इत इति आदायगृहीतजारवेषः ।(खड्गमुद्यम्य अपि रमणीयमेतत्)

शिष्यः – (णट्ठिसं, स अं अण्णो विअ वामो सामी पडिहाइ, तागच्छदु संकेअठळम्)

In Public domain. Digitization Muthulakshmi Research Academy

स्वयमन्य इव वामस्वामी प्रतिभाति, तद्गच्छ त्वं सङ्केतस्थलम् ।

(उभे परिक्रामतः)

(ततः प्रविशति गृहीतपुरुषवेषा सोमवल्ली)

सोमवल्ली –(उपसृत्य) किं वा एद्ध णिरन्तर तिमिरे णिसीधे सो जणो आअमिंस्सदि किं वा निरन्तरतिमिरे निशीथे स जन आगमिष्यति।

(सव्वहा अद्धाहणं विलोअणं पुरमाणं दाणिं होइ तादिशं आअमिस्सदि)

सर्वथा अदक्षिणं विलोचनं स्फुरमाणमिदानीं भवति। तद्ध्रुवमागमिष्यति (खड्गमादाय)

(अइरेण अहिमदसिद्धी हविस्सदि) अचिरेणाभिमतसिद्धिर्भविष्यति

मस्करी – एतदेव तया दृष्टिसंज्ञया सूचितं सङ्केतस्थलम् ।

शिष्यः–(परितोऽवलोक्य) (एद्ध जिण्णकुड्डन्तरे आसीविसपयरणअणप्फुरणं विअदीसइ)

अत्र जीर्णकुड्यन्तरे आशीविषप्रकरनयनस्फुरणमिव दृश्यते।

मस्करी – मुग्ध खद्योतस्फुरणमेव, प्रविशाग्रतः ।

शिष्यः – (परिक्राम्य) (एद्ध कोवि आकृदिविसेसो विअ दीसइ)

अत्र कोऽप्याकृतिविशेष इव दृश्यते ?

मस्करी – तद्ध्रुवमागतैव प्रिया उपसर्पति सः । संकल्पलब्धप्रियसमा तिष्ठति।

शिष्यः – (उवज्झाअ एसो पुरुसो विअखग्गहत्थो दीसइ)

उपाध्याय एष पुरुष इव खड्गहस्तो दृश्यते।

मस्करी – (खड्गमुद्यम्य) भोः कस्त्वम् । किमुत्तरं न ददासि । तत्खड्गेनामुना खण्डयामि ते मुण्डम् ।

सोमवल्ली – (सभयम्, स्वगतम्) (एव्वं होदु) एवं भवतु।

 In Public domain. Digitization Muthulakshmi Research Academy

(प्रकाशम्) (को णिउणो खग्गहत्थं मं णिवारेदुं । सव्वमुण्डमालिनी भद्दकाळी खु अहं तुज्झ रुहिरपायिणी)

को निपुणः खड्गहस्तां मां निवारयितुं सर्वमुण्डमालिनी भद्रकाळी खल्वहं तव रुधिरपायिनी।

शिष्यः – (उवज्झाओ भद्दकल्या पारणी करिस्स ज्जइ ता ता सण्णिहिदा एणं मोएहि, हन्त ण को वि वारेदि)

उपाध्यायो भद्रकाल्या पारणीकरिष्यते, तत् सन्निहिता एनं मोचय, हन्त न कोऽपि वारयति। (सस्वरमुच्चैः)

(णअररक्खआ झडिदि आअच्छिअ इमं रक्खह रक्खह, विसेसदो तवस्सि एसोण जुत्तं उपेक्खिदुं एणं तुह्माणं)

नगररक्षकाः झटित्यागत्य इमं रक्षत रक्षत, विशेषतस्तपस्व्येषः न युक्तमुपेक्षितुमेनं युष्माकम्।

(नेपथ्ये)

आः शक्तिनगररक्षकेषु जीवत्सु भद्रकाल्या अन्यासां देवतानां पौरजनमाक्रमितुम्। मुञ्च मुञ्चैनं भद्रकालि! महाराजदेवाज्ञया, यद्भवत्या नित्याराधनपरो देवः।

सोमवल्ली – (मस्करिणं विगृह्य) (णाहं भद्दकाळी तुह संकेदवळ्ळहा एव्व किं अण्णोण्णं अण्णहा संभाविअं, आरक्खका वि आपडि आ एव्व, किं करणिज्जं)

नाहं भद्रकाली, तव संकेतवल्लभैव किमन्योन्यमन्यथा संभावितम्, आरक्षका अप्यापतिता एव किं करणीयम्।

मस्करी – का गतिः ? कुत्र वा गमिष्यामः ? वत्स! अलमाक्रन्देन, एषा हि

In Public domain. Digitization Muthulakshmi Research Academy

गृहीतपुरुषवेषा सोमवल्ली सम्प्राप्ता आरक्षकाश्चासन्नतराः किमित्याकुलास्सर्वगतश्शब्दमनुसरन्ति, नमो नारायणाय, वसुन्धरे रन्ध्रं देहि, देवेन सर्वं प्रहन्यते।

सोमवल्ली – (ता अहो सहं पेव्व अण्णोण्णखग्गेण मुत्तजीविआ भवाम, जांसअळानां पुरदो भूसुरकुळपांसुळो तादो हविस्सदि, अय्य मं वा खग्गेण विदारेहि, चिरस्स फळिअं कुळस्स पांसुळत्वेन, अहवा सअं एव्व अत्ताणं खग्गेण वावादेमि इदि ..)

तद्वयं स्वयमेवान्योन्यं खड्गेन मुक्तजीविता भवामः । यत्सकलानां पुरतो भूसुरकुलपांसुलस्तातो भविष्यति । आर्य आवां खड्गेन विदारय, चिरस्य फलितं कुलस्य पांसुलत्वेन, अथवा स्वयमेवात्मानं खड्गेन व्यापादयामि। (इति खड्गमुत्क्षिपति)

मस्तरी – (वारयति)

(ततः प्रविशन्ति शूलमित्रप्रमुखा नागरिकाः)

शूलमित्रः – (आः शक्तिः इत्यादि पठित्वा शिष्यं गृहीत्वा संताड्य)
मूर्ख भद्रकाल्या क इहात्र त्रासितः । किन्तूष्णीं भवसि, यद्येवं त्वच्छिर एव भद्रकाल्या उपहरामः।

शिष्यः – (सभयम्) (एद्ध भद्दकाळी) अत्र भद्रकाली

शूलमित्रः – कवान्या ?

शिष्यः – (कहेमि सव्वं) कथयामि सर्वम्।
(जइ मं णताडेसि) यदि मां न ताडयसि।

शूलमित्रः – तथा क्रियते कथय यथार्थम् ।

शिष्यः – (एसा उण राअपुरोहिदस्स जण्णादिण्णस्य पुत्ती माहवभट्टगहिणी सोमवल्ली एव्व । एसो वि मह उवज्झायो सण्णासी)

In Public domain. Digitization Muthulakshmi Research Academy

एषा पुनः राजपुरोहितस्य यज्ञदत्तस्य पुत्री माधवभट्टगृहीणी सोमवल्लयेव, एषोऽपि ममोपाध्यायस्सन्यासी।

शूलमित्रः – दर्शय तौ।

शिष्यः – (इ दो एव्व जिण्णघरब्भन्तरे इमौ चिट्ठति)
इत एव जीर्णगृहाभ्यन्तरे इमौ तिष्ठतः।

(परिक्रम्य दर्शयति)

शूलमित्रः – आ हन्त पुरुषाविमौ खड्गहस्तौ, सर्वे सावधानाः भवन्तु,
(शिष्यं प्रति) किमन्यथा कथितं त्वया ।

(इति पुनस्ताडयति)

शिष्यः – (अविह भो ण जुत्तं मं णिरपराहं ताडेदुं । सच्चं एव्व सा गहीदपुरु-सवेसा सोमवल्ली । एसो वि वेसंतरिदो मह उ वज्झाओ)
भो न युक्तं मां निरपराधं ताडयितुम् । सत्यमेव सा गृहीतपुरुषवेषा सोमवल्ली। एषोऽपि वेषान्तरितो ममोपाध्यायः नागरिकास्तौ गृह्णन्तु।

शूलमित्रः – (खड्गमादाय कक्ष्याभिर्बध्नाति तौ)

शूलमित्रः –(चिरस्स सोमवळ्ळी कुळधा अह्माणं हत्थगदा । एसो कपटधुण्णोपीति)
चिरस्य सोवल्ली कुलटा अस्माकं हस्तगता । एष कपटसन्न्यास्यपि।

शूलमित्रः – तदेवं स्थिताविमौ राज्ञः पुरतः स्थापनीयौ । यज्ञदत्तपक्षपाती खलु राजा ।

नागरिकाः-(एदेण जण्णदिण्णस्य कुळक्खओ भवे, तद् एव्य अह्माणं अब्भत्थणो)
एतेन यज्ञदत्तस्य कुलक्षयो भवेत् । तत्रै वास्माकमभ्यर्थना।

(सर्वे परिक्रामन्ति)

शूलमित्रः – किं मस्करिन् जपसि निरन्तरः।

In Public domain. Digitization Muthulakshmi Research Academy

मस्करी – किमत्र कथयामि । दृष्टस्यान्तकस्य प्रसीदतु भवान् ।

शूलमित्रः – कः प्रसन्नः प्रसादः । यद्येवं,

कृतत्रिषवणा दिवा कृतकवेषभिक्षाटन-
च्छलेन शफरीदृशः स्ववशमानयन्तोऽधुना ।
निपीय सरसां सुरां निशि च गूढवेषा वधूः
सरागमनुभूयतो बत वसन्ति सन्न्यासिनः ॥84॥

तदस्य यूयमेव प्रभवो दण्डयितुं मोचयितुं वा ..

नागरिकाः – (कथं मोचणिज्जो तुमं एव्वंविहेण तुए यदिव्वदा भङ्गो पडिदिणं करिज्झइ ता सूळं एव्व आरोपणिज्जो)

कथं मोचनीयस्त्वमेवंविधेन त्वया पतिव्रताभङ्गः प्रतिदिनं क्रियते, तच्छूलमेवारोपणीयः]

शूलमित्रः–मैवम् , यदयं ब्राह्मणब्रुवस्तदस्य चक्षुरुत्पाटनं शुनः पाददण्डः ।

मस्करी – तथैवाहं दण्डनीयः । एनां कुलघ्नीं कर्तुं न युक्तं युष्माकम्

सोमवल्ली –(पादयोः पतित्वा) (ण जुत्तं तुह्माणं अह्माणं कुलक्खयं कारेदुं)

न युक्तं युष्माकमस्माकं कुलक्षयं कारयितुम्।

शूलमित्रः – (सरोषम्) अरे रण्डे तव कुलक्षयकृतः, इहहि

सन्ताडयामश्चरणेन तावत्कुक्षिप्रदेशं कुलटे तवेमम् ।
परश्शतं प्रौढतरं जनानां शिरांसि भग्नानि चिराद्गलन्ति ॥85॥

नागरिकाः – (एदं राजकुळं) एतद्राजकुलम्।

शूल - (परिक्रम्य दृष्ट्वा) एष हि विदूषकेन किमपि मन्त्रयन्महाराज इत एवाभिवर्तते तदुपसरामः।

(ततः प्रविशति विदूषकेन सह राजा)

राजा – (ण जाणामि किं एदं ति । भद्दकाळिद्दि सुदाइ अक्खराइ)

न जानामि किमेतदिति, भद्रकाळीति श्रुतान्यक्षराणि।

शूल – सर्वेऽत्र तिष्ठन्तु , अहमेव गत्वा राज्ञस्तदेतद्विज्ञापयामि।

(इति परिक्रामति)

राजा – कः कोऽत्र भोः ।

शूलमित्रः – (उपसृत्य प्रणम्य) एषोऽहम् ।

राजा – शूलमित्र किमाक्रन्दो महानासीत् ।

शूलमित्रः- देव नान्यत् । यदर्थमासीदाक्रन्दस्तदिमौ गृहीतौ ।

विदूषकः- (ही ही भद्दकाळिद्दि भीदो ठिदो । ता दर्सेहि एदे)

भद्रकालीति भीतः स्थितः तद्दर्शयैतौ।

राजा – (विहस्य) भद्र तथा क्रियताम् ।

शूलमित्रः – (निष्क्रम्य ताभ्यां सह प्रविश्य दर्शयति)

राजा – काविमौ ?

शूलमित्रः – देव एव निरूपयतु ।

विदूषकः – (अहं एव्व निरूपेमि । एदे के वि खग्गहत्था पुरुसा ण भद्दकाळयः ण पिसाआ णहुरक्खसा)

अहमेव निरूपयामि एते केऽपि खड्गहस्ताः पुरुषाः न भद्रकाळ्यो न पिशाचा न राक्षसाः।

राजा – तिष्ठतु निरूपयामि -

कक्ष्यान्वितः क्रूर इवात्तखड्गः काषायवाञ्छान्त इवानुमेयः ।

विदूषकः – (हीही एसो गहीदो जई) एष गृहीतो यतिः।

राजा – अस्य सहचरी कुत्र

In Public domain. Digitization Muthulakshmi Research Academy

शूलमित्रः – उभयोरनयोर्निरूपयतु देवः।

राजा – (निर्वर्ण्य)

एष खड्गधरो नूनं स्त्रीव बद्धो विलोक्यते ।
एतयोर्वदने स्त्रीत्वं लक्ष्यं खड्गभृतोर्ध्रुवम् ॥85॥

शूलमित्रः – विशेषदर्शी खलु देवः

विदूषकः – (अहो धीरत्तणं इत्थिआजणस्स) अहो धीरत्वं स्त्रीजनस्य।

राजा – भद्र एतेषां पृथक् संज्ञामावेदय ।

शूलमित्रः –एषः महाराजस्य परिचितपूर्वो योगानन्दनामामस्करी। अमुष्य शिष्योऽयं बालः । एषा पुनर्महाराजपुरोहितस्य यज्ञदत्तस्य पुत्री माधवभट्टस्य गृहिणी गृहीतपुरुषवेषा कुलटा।

राजा - अहो कामिता किं किं न करोति।

विदूषकः – (णज एसा इद्धिआ, किं दु रक्खसी एव्व ता पुरोहिदोविरक्खसो एव्व, णज बह्मणी)

नचैषा स्त्री किन्तु राक्षस्येव, तत्पुरोहितोऽपि राक्षस एव न च ब्राह्मणः

राजा – (विमृश्य)

पथि तिमिरभयं करे प्रचारःकरधृत एव सहाय एष खड्गः ।
अधिगतपुरुषाकृतेरमुष्याःपरपुरुषाधिगमोचितो हि यत्नः ॥87॥

शूलमित्रः – तदेनां युक्तं दण्डय, यज्ञदत्तं माधवभट्टं च नगरान्निर्वासय

(दण्डयित्वा) मां देव यदाज्ञापयसि तथा करोमि ।

मस्करी – राजानुमतो धर्मः ।

(विदूषकः) – (तह करणिज्जं एव्व) तथा करणीयमेव।

(राजा) – तस्याः पाणिग्रहणमुहूर्तं निरूपय।

 In Public domain. Digitization Muthulakshmi Research Academy

विदूषकः –(विमृश्य) (अज्ज एव्व दुद्दिणे घटिआ उपरि पाणिग्गहणलग्गं)
अद्यैव दुर्दिने घटिकोपरि पाणिग्रहणलग्नम् ।

राजा - कोऽत्र भोः ।

(प्रविश्य)

कञ्चुकी – आज्ञापयतु देवः ।

राजा – श्रीपादस्य पाणिग्रहणमहोत्सवाय प्रसाधनान्यानीयन्ताम् ।

विदूशकः – (अपवार्य) (सोमवळ्ळीजार वअस्सेण देविक्कोणस्य
आहरणस्साध्दं मह देहि । अण्णहा विघ्नं करेमि)
सोमवल्लीजारवयस्येन ते दत्तस्याभरणस्यार्धं मे देहि । अन्यथा विघ्नं करोमि।

मस्करी - किमुच्यते ।

कञ्चुकी – यदाज्ञापयति देवः (इति निष्क्रम्य पुनः प्रविश्य प्रसाधनान्यर्पयति)
राजा – किं विवाहक्रमो विधातव्यः ।

विदूषकः – (किं पुणो वि होमो पुव्वं एंव्वं जोणिकुण्डे णिजदण्डस्सुवेण णिव्वत्तिदो खु)
किं पुनरपि होमः पूर्वमेव योनिकुण्डे निजदण्डस्रुवेण निर्वर्तितः खलु

राजा – (सशिरः कम्पम्) भगवन्नेवमेव
दण्डं स्रुवं दीर्घतरं प्रकल्प्य कुण्डं वराङ्गं कुटिलेक्षणायाः ।
मन्त्रं पवित्रं भणितं हविश्च रेतः कृतो ह्येष विवाहहोमः ॥88॥

शूलमित्रः – अद्य साग्निसाक्षिकं पाणिपीडनमस्तु ।

विदूषकः – (प्रसाधनान्यामुच्य सोमवल्ल्याः पाणि पीडयति)

राजा – दिष्ट्या गृहस्थाश्रमं प्रविष्टो मस्करी ।

मस्करी – (सानन्दम्) राजंस्तव गुणा मां मुखरयन्ति,

In Public domain. Digitization Muthulakshmi Research Academy

काष्ण्यं नेत्रकनीनिकागतमपि क्षिप्त्वा जगत्युद्यता
कीर्तिः फुल्लपटोलपुष्पसहरत्युत्कण्ठिनी तावकी ।
नद्यन्तेषु बकायते प्रतिदिनं घोषेषु तक्रायते
केशान्ते पलितायते खरसमप्राप्यं सुवामभ्रुवाम् ॥89॥

विदूषकः – (साहु मक्खरि अ साहु अहं विवण्णेमि)
साधु मस्करिन् साधु अहमपि वर्णयामि।

(संस्कृतमाश्रित्य)

दानेन त्वं दशार्धं शिरसि कलयसे नाकलोकद्रुमाणां
गाढोरस्ताडनानि प्रकटयसि समुच्छ्रायभूम्ना सुमेरोः ।
गम्भीर्येणापि धत्से कलशजलनिधेर्नासिकाच्छेदलीलां
कीर्त्या षण्डत्वमिन्दोः कलयसि सुमहाक्षत्रवंशैकबीज ॥90॥

अपि च – नपुंसकः किं स भवान् सर्वदा धनलालसः ।
लक्ष्मीर्नाम प्रिया राज्ञी कविभ्यो येन दीयते ॥91॥

एवं च

वने च त्वद्रिपुस्त्रीणां व्याधापहृत (वाससाम्)
ताभिस्तु तदादाय पल्लवं वसनाय च ॥92॥

पुंस्त्वं प्रदाय नारीभ्यो यासि स्त्रीत्वं त्वमन्वहम् ।
तथापि ते स्तनद्वन्द्वं नोन्नतं न च पीवरम् ॥93॥

राजा – अलमलमन्यादृशवाचाटनेन योगानन्द किं ते भूयः प्रियमुपहरामि ।

मस्करी – किमितः प्रियमस्ति । तथापीदमस्तु भरतवाक्यम् ।

कालाम्भोदा युवानो झलझलनिनदैः पूरिताशावकाशैः
पाथो वर्षाभिजातैर्विदधतु वसुधामुल्लसत्सस्यगर्भाम् ।

 In Public domain. Digitization Muthulakshmi Research Academy

.....स्वयमुरसि मुखे व्याहरन् सामरस्यं
दीर्घायुर्देवराजोऽप्यवतु वसुमती चक्रमाचन्द्रतारम् ॥94॥

(इति निष्क्रान्तास्सर्वे)

।। इति डिण्डिमकविविरचितं सोमवल्लीयोगानन्दं
नाम प्रहसनं सम्पूर्णम् ।।

।। श्रीरस्तु ।।

श्री देववल्लान्वयाम्भोनिधितुहिनकरस्सुब्बरायाभिधानो
धात्रब्दे चैषमासे गरुति च बहुले द्वादशीमन्दघस्रे ।
एतत्सम्यग्विलिख्य प्रहसनमसमं डिण्डिमार्यप्रणीतं
प्रादात्कौण्डिन्यगोत्राम्बुधिहिमरुचये सुब्बरायाभिधाय ।।

।। श्रीसीतारामचन्द्रपरब्रह्मार्पणमस्तु ।।

इति शम्

In Public domain. Digitization Muthulakshmi Research Academy

अकारादिक्रमश्लोकसूची

श्लोक सङ्ख्या	श्लोकपादः
73.	अकरग्रहमधर
26.	अधुनाहिनूतनदिनाधिनायक
74.	अम्भोदं न नभस्स्थलं
55.	अयथातथंकिमपिचिन्तयत्यये
49.	अहो पवित्राण्यङ्गानि
25.	आदानोत्क्षेपणैरर्घ्यमपामञ्जलिभाजनैः।
46.	आलिङ्ग्यसाधून्समयोपपातै
60.	आलोकितुमिवाशासु
87.	एष खड्गधरो नूनं
44.	एषा पापीयसी चेटी
68.	एषास्मि प्रार्थयन्ती मस्करिणं
67.	एसह्मि पत्थयन्ती मक्खरिणी
30.	करकृतकलितदण्डकाष्ठो
19.	करात्तदण्डकलितोर्ध्वपुण्ड्रः
2.	कल्याणायास्तु वः कामः
10.	कविःस्वयंडिण्डिमसार्वभोमः
72.	का लज्जा का भीतिः का
71.	का ळज्जा का भीती का उण
23.	काकाः मज्जनमाचरन्ति
90.	काष्ण्यं नेत्रकनीनिकागतमपि
95.	कालाम्भोदा युवानो झलझलनिनदैः

 In Public domain. Digitization Muthulakshmi Research Academy

37. किंचास्याभैक्षदानायमठसमागतायाः
47. किंदातुमिच्छसिपणंकितवावतंस
63. कीलग्रासरसं निरस्य विहरन्
45. *कुडिकंचिसमुदवळ्ळह
16. कुन्दप्रसूनाम्भरेक्रमेण
85. कृतत्रिषवणा दिवा
39. कृतागसामेव किलाप्रदण्ड
35. घृतशौचविधिःकृतःकलास्या
70. जृम्भते सह वदत्यचेतनै
48. ताम्बूलकथनस्यापि
69. तुलसीमणिदामशोभमाना
89. दण्डं स्रुवं दीर्घतरं प्रकल्प्य
58. दत्तासुराऽस्माभिरियं
91. दानेन त्वं दशार्धं शिरसि
65. दीसइ पुणोवि ज इ सो
66. दृश्यते पुनरपि यदि स
64. दोर्मूलेन नखाङ्किते
82. धूर्ताः स्त्रीवेषभाजस्तमसि
92. नपुंसकः किं स भवान्
11. नवनवरमणपराणां
42. नारीमविश्वस्यममापराङ्गं
81. निर्गन्धान्विनिवेश्य
43. न्यस्य क्वापि पटावृते विटमसौ

In Public domain. Digitization Muthulakshmi Research Academy

77. न्यायः काणादशास्त्राणां

6. पण्यस्त्रीगृहमेधिनःपरवधूस्वीकारनारायणाः

88. पथि तिमिरभयं करे प्रचारः

34. पर्वणि दिवापि सङ्गः

62. पारावतमिथुनानां

54.A पुंभावस्यतपःफलं

94. पुंस्त्वं प्रदाय नारीभ्यो

29. पुष्पकलनाभिरामा

33. पुष्पेक्षणेपुष्पवतीमपीत्वा

12. पूगाः पुञ्जितपुष्पधूलिशिरसो

1. पूर्वं पूरितरेतसश्शिखिमुखे

32. पूर्वेद्युरातिथ्यपुरस्कृतेन

52. प्रदक्षिणयते नभस्सह भुवा प्रसादाय मां

28. फेरुर्वांशितमातनोपितनुतेघूकःस्वयंघूक्रियां

57. भद्रमतीमीदृशं त्यज

51. भद्रे मुञ्च ममाङ्गानि

7. मणितस्वरमन्त्रपाठकानां

17. मत्तेन कृत्ते मधुनापि

15. मधुकरसमवायोमादृशैर्वर्ण्यतेकिं

13. मधुपरवमणितमुखरा

41. मध्येसभंमण्डलनृत्तकाले

18. मरुदयमलिनानुगम्यमानो

4. मुहुर्मुहुर्मोहनवारिपूरैः

In Public domain. Digitization Muthulakshmi Research Academy

3. यद्यस्तिदोषोममपादघातं
8. यादृशरसप्रयोगाद्भङ्गिरिटिर्नाट्यशास्त्रपरमगुरोः।
40. राकाचन्द्रविनिन्दकास्विसरन्मन्दस्मितज्योतिषां
93. वने च त्वद्रिपुस्त्रीणां
54. वल्मीकरमन्ध्रेणवयंप्रविश्य
75. वसिष्ठागस्त्ययो
21. विद्योतयन्तीमनसोविकारं
22. विधुफलेनसहैववियत्तरो
31. विलम्बिकूर्चौविवृतोर्ध्वपुण्ड्रः
80. विविधविटवरोपभोगिनीनां
56. विवृतवदनलक्ष्यदन्तशङ्कु
78. वेश्या यथा हि धूर्तानां
38. व्यभिचारं विहितवती मया
20. शक्यो हि सोढुं सुरतोपयोगि
79. शब्दः प्रयोजयति केवलमात्मकार्ये
50. शिरसि प्रहरति मुष्ट्या
83. शिष्येषु प्रपथं विदग्धविधवा
14. शैत्येशनैस्ताम्यतिगाढतापाः
96. श्री देववल्लान्वयाम्भोनिधि
86. सन्ताडयामश्चरणेन
24. सन्ध्याशुन्यास्थिलेखा मुख इव
84. सुरपतिमहानसगृहे स्वैरं
76. स्त्रियस्सर्वाङ्गतो मेध्या

In Public domain. Digitization Muthulakshmi Research Academy

61. स्त्रीणां स्वेदकणा गलन्ति

9. स्त्रीत्वं प्राप हरिर्भगप्रणयनव्यग्रः

59. स्थित्वा काकवदन्नपिण्डकवलीकारः

27. स्वप्नेऽङ्गनास्वैररतच्युतेन

36. हरिद्रागन्धिलौ कक्षौ

53. हरिस्त्वमसि

5. क्षेत्रंकिमप्यवतुवःकृषतांजनानां

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

श्लोकानां वृत्तसूची

श्लो.सं	श्लोकपादः	वृत्तम्
1.	पूर्वं पूरितरेतसश्शिखिमुखे	शार्दूलविक्रीडितम्
2.	कल्याणायास्तु वः कामः	अनुष्टुप्
3.	यद्यस्ति दोषो मम पादघातं	इन्द्रवज्रा
4.	मुहुर्मुहुर्मोहनवारिपूरैः	उपेन्द्रवज्रा
5.	क्षेत्रंकिमप्यवतुवःकृषतां जनानां	वसन्ततिलका
6.	पण्यस्त्रीगृहमेधिनःपरवधूस्वीकारनारायणाः	शार्दूलविक्रीडितम्
7.	मणितस्वरमन्त्रपाठकानां	मालभारिणी
8.	यादृशरसप्रयोगाद्भृङ्गिरिटिर्नाट्यशास्त्रपरमगुरोः।	आर्या
9.	स्त्रीत्वं प्राप हरिर्भगप्रणयनव्यग्रः	शार्दूलविक्रीडितम्
10.	कविःस्वयंडिण्डिमसार्वभोमः	उपजातिः
11.	नवनवरमणपराणां	आर्या
12.	पूगाः पुञ्जितपुष्पधूलिशिरसो	शार्दूलविक्रीडितम्
13.	मधुपरवमणितमुखरा	आर्या
14.	शैत्येशनैस्ताम्यतिगाढतापाः	इन्द्रवज्रा
15.	मधुकरसमवायोमादृशैर्वर्ण्यतेकिं	मालिनी
16.	कुन्दप्रसूनाम्भरेक्रमेण	इन्द्रवज्रा
17.	मत्तेन कृत्ते मधुनापि	इन्द्रवज्रा
18.	मरुदयमलिनानुगम्यमानो	पुष्पिताग्रा
19.	करात्तदण्डकलितोर्ध्वपुण्ड्रः	उपजातिः
20.	शक्यो हि सोढुं सुरतोपयोगि	इन्द्रवज्रा
21.	विद्योतयन्तीमनसोविकारं	इन्द्रवज्रा
22.	विधुफलेनसहैववियत्तरो	द्रुतविलम्बितम्
23.	काकाः मज्जनमाचरन्ति	शार्दूलविक्रीडितम्
24.	सन्ध्याशुन्यास्थिलेखा मुख इव	स्रग्धरा

 In Public domain. Digitization Muthulakshmi Research Academy

25.	आदानोत्क्षेपणैरर्घ्यमपामञ्जलिभाजनैः।	अनुष्टुप्
26.	अधुनाहिनूतनदिनाधिनायक	मञ्जुभाषिणी
27.	स्वप्नेऽङ्गनास्वैररतच्युतेन	इन्द्रवज्रा
28.	फेरुर्वाशितमातनोपितनुतेघूकःस्वयंघूक्रियां	शार्दूलविक्रीडितम्
29.	पुष्पकलनाभिरामा	आर्या
30.	करकृतकलितदण्डकाष्ठो	आर्या
31.	विलम्बिकूर्चोविवृतोर्ध्वपुण्ड्रः	उपेन्द्रवज्रा
32.	पूर्वेद्युरातिथ्यपुरस्कृतेन	इन्द्रवज्रा
33.	पुष्पेक्षणेपुष्पवतीमपीत्वा	इन्द्रवज्रा
34.	पर्वणि दिवापि सङ्गः	आर्या
35.	घृतशौचविधिःकृतःकलास्या	मालभारिणी
36.	हरिद्रागन्धिलौ कक्षौ	अनुष्टुप्
37.	विगलितधम्मिल्लभरं	आर्या
38.	व्यभिचारं विहितवती मया	आर्या
39.	कृतागसामेव किलाप्रदण्ड	उपेन्द्रवज्रा
40.	राकाचन्द्रविनिन्दकास्विसरन्मन्दस्मितज्योतिषां	शार्दूलविक्रीडितम्
41.	मध्येसभंमण्डलनृत्तकाले	इन्द्रवज्रा
42.	नारीमविश्वस्यममापराङ्गे	इन्द्रवज्रा
43.	न्यस्य क्वापि पटावृते विटमसौ	शार्दूलविक्रीडितम्
44.	एषा पापीयसी चेटी	अनुष्टुप्
46.	आलिङ्ग्यसाधून्समयोपपातै	इन्द्रवज्रा
47.	किंदातुमिच्छसिपणंकितवावतंस	वसन्ततिलका
48.	ताम्बूलकथनस्यापि	अनुष्टुप्
49.	अहो पवित्राण्यङ्गानि	अनुष्टुप्
50.	शिरसि प्रहरति मुष्ट्या	आर्या
51.	भद्रे मुञ्च ममाङ्गानि	अनुष्टुप्

In Public domain. Digitization Muthulakshmi Research Academy

52.	प्रदक्षिणयते नभस्सह भुवा प्रसादाय मां	पृथ्वी
53.	हरिस्त्वमसि क एष परिघूर्णयत्यरुणमीक्षणं लीलया	पृथ्वी
54.	वल्मीकरमन्ध्रेणवयंप्रविश्य	इन्द्रवज्रा
54.A	पुंभावस्यतपःफलं	शार्दूलविक्रीडितम्
55.	अयथातथंकिमपिचिन्तयत्यये	मञ्जुभाषिणी
56.	विवृतवदनलक्ष्यदन्तशङ्कु	पुष्पिताग्रा
57.	भद्रमतीमीदृशं त्यज	आर्या
58.	दत्तासुराऽस्माभिरियं	इन्द्रवज्रा
59.	स्थित्वा काकवदन्नपिण्डकवलीकारः	शार्दूलविक्रीडितम्
60.	आलोकितुमिवाशासु	अनुष्टुप्
61.	स्त्रीणां स्वेदकणा गलन्ति	शार्दूलविक्रीडितम्
62.	पारावतमिथुनानां	आर्या
63.	कीलग्रासरसं निरस्य विहरन्	शार्दूलविक्रीडितम्
64.	दोर्मूलेन नखाङ्किते	शार्दूलविक्रीडितम्
66.	दृश्यते पुनरपि यदि स	आर्या
68.	एषास्मि प्रार्थयन्ती मस्करिणं	आर्या
69.	तुलसीमणिदामशोभमाना	मालभारिणी
70.	जृम्भते सह वदत्यचेतनै	रथोध्दता
72.	का लज्जा का भीतिः का	आर्या
73.	अकरग्रहमधर	आर्या
74.	अम्भोदं न नभस्स्थलं	शार्दूलविक्रीडितम्
75.	वसिष्ठागस्त्ययो	अनुष्टुप्
76.	स्त्रियस्सर्वाङ्गतो मेध्या	अनुष्टुप्
77.	न्यायः काणादशास्त्राणां	अनुष्टुप्
78.	वेश्या यथा हि धूर्तानां	अनुष्टुप्

In Public domain. Digitization Muthulakshmi Research Academy

79.	शब्दः प्रयोजयति केवलमात्मकार्यं	वसन्ततिलका
80.	विविधविटवरोपभोगिनीनां	पुष्पिताग्रा
81.	निर्गन्धान्विनिवेश्य	शार्दूलविक्रीडितम्
82.	धूर्ताः स्त्रीवेषभाजस्तमसि	स्रग्धरा
83.	शिष्येषु प्रपथं विदग्धविधवा	शार्दूलविक्रीडितम्
84.	सुरपतिमहानसगृहे स्वैरं	आर्या
85.	कृतत्रिषवणा दिवा	पृथ्वी
86.	सन्ताडयामश्चरणेन	उपेन्द्रवज्रा
87.	एष खड्गधरो नूनं	अनुष्टुप्
88.	पथि तिमिरभयं करे प्रचारः	पुष्पिताग्रा
89.	दण्डं स्रुवं दीर्घतरं प्रकल्प्य	इन्द्रवज्रा
90.	काष्ण्यं नेत्रकनीनिकागतमपि	शार्दूलविक्रीडितम्
91.	दानेन त्वं दशार्धं शिरसि	स्रग्धरा
92.	नपुंसकः किं स भवान्	अनुष्टुप्
93.	वने च त्वद्रिपुस्त्रीणां	अनुष्टुप्
94.	पुंस्त्वं प्रदाय नारीभ्यो	अनुष्टुप्
95.	कालाम्भोदा युवानो झलझलननिदैः	स्रग्धरा
96.	श्री देववल्लान्वयाम्भोनिधि	स्रग्धरा

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

Preamble

Sanskrit Academy, is a research Institute functioning as Adarsh Sanskrit Shodha Sansthan under Central Sanskrit University, New Delhi, has been undertaking the noble tasks of publishing invaluable Sanskrit works, translating rare manuscripts and imparting basics in the Sanskrit language to the interested students, holding workshops and seminars, promoting Sanskrit language by various academic activities. This Institution is the oldest and the only Research Centre under the aegis of Osmania University, Hyderabad, is contributing in the field of Sanskrit Research. Sanskrit Academy, aiming at promoting Sanskrit learning in general and research in particular has brought about 150 publications valued to be possessing high research standards.

Sanskrit Academy established with three aims and objectives are as under:-

I. To collect, preserve and investigate old and rare Sanskrit Manuscripts

II. To Edit and publish rare Sanskrit Manuscripts and also to undertake the publications of research work pertaining to Sanskrit

III. To promote Sanskrit learning in general and research in particular.

संस्कृत अकाडमी
(केन्द्रीयसंस्कृतविश्वविद्यालयेन मानिता आदर्शशोधसंस्था)
उस्मानियाविश्वविद्यालयः, हैदराबाद् - 07
2023